सर्वत्रैव ब्रह्ममाहात्म्यातिक्रान्तत्वं प्रधानस्योपवर्ण्यंतेतो न स्वातन्त्र्येण कार्यकारित्वं तस्य कुत्रापि वेदे प्रतिपादितम् ॥१।४।९॥

नन्वजाया अपि किञ्चित्कारणं नियामकं वा चेत्कथं तस्या अजेत्यभिधानसार्थक्यमत आह—

कल्पनोपदेशाच्च मध्वादिवदविरोधः ॥१।४।१०॥

कल्पनं सृष्टिः। कल्पनस्योपदेशः कल्पनोपदेशस्तस्मात्। विरोधपरिहारसमर्थश्चकारः। सृष्टेरुपदेशः श्रूयते वेदे। तथाहि, "इयं विसृष्टिर्यत आ बभूव" (ऋ० १०।१२९।७) इति। तैत्तिरीयब्राह्मणे (२।८।९।६) पीयं श्रुतिः। सृष्टिकल्पनोपदेशः श्रूयते तेन को लाभो लब्धो भवता? उच्यते। सृष्टिकाल इयं विविधै रूपैर्जायमानेव प्रतीयमानेवापि प्रलयकाले विश्वम्भरेण ब्रह्मणा सह तत्स्वरूपापन्नाविभक्तनामरूपगुणा चावतिष्ठत इत्यजा। अथवा न हि नियाम्यत्वेनैव तस्या अजात्वं विहन्यते। जीवोप्यजः। स च ब्रह्मणो नियाम्य एव। नात्र कश्चिद्विरोधः। तथापि पूर्वकल्पमनुसृत्य परिहरति मध्वादिवदविरोध इति। "तद्यजुस्तद्वैन्मध्वेवैष तृचो रसो वै मधु०" (शत० ७।५।१।४) 'अयं लोको बर्हिः' (शत० १।३।३।२४) "आपो हि कुशाः" (शत० १।२।४।३) "क्षत्रं वै जुहूर्विश इतराः स्रुचः" (शत० १।३।१।१५) "गृहा हि पशवः" (शत० १।६।४।१४) "यज्ञो वै विष्णुः" (शत० १।१।२।१३) "वज्रो वा आज्यम्" (शत० १।४।४।४) "वज्रो वा आपः" (शत० १।१।१।१७) इत्यादिषु यथातथात्वेपि तथात्वारोपस्तथानजात्वेप्यजात्वारोपः। वस्तुतस्त्वचिन्त्यशक्तिनः परस्य ब्रह्मणः सर्वनामरूपगुणादिप्रसविनीमायैवाजा। तेन न तस्या अजात्वे विवादावकाशः ॥१।४।१०॥ इति चमसाधिकरणम् ॥२॥

(अथ संख्योपसंग्रहाधिकरणम् ॥३॥)

पुनरपि सांख्यसंस्कृतं चतुर्विंशतितत्त्वात्मकं सिद्धान्तं दूषयितुमाह—

न संख्योपसंग्रहादपि नानाभावादतिरेकाच्च ॥१।४।११॥

संख्याया उपग्रहः संख्योपग्रहस्तस्मादपि सांख्यमतमनभिमतं वेदस्य।

अत्रायमाशयः। वाजसनेयिनः पठन्ति, 'एकयास्तुवत प्रजा अधीयन्त, तिसृभिरस्तुवत ब्रह्मासृज्यत, पञ्चभिरस्तुवत भूतान्यसृज्यन्त, सप्तभिरस्तुवत सप्तऋषयोऽसृज्यन्त, नवभिरस्तुवत पितरोऽसृज्यन्त, एकादशभिरस्तुवत ऋतवोऽसृज्यन्त, त्रयोदशभिरस्तुवत मासा असृज्यन्त, पञ्चदशभिरस्तुवत क्षत्रमसृज्यत, सप्तदशभिरस्तुवत ग्राम्याः पशवोऽसृज्यन्त, नवदशभिरस्तुवत शूद्रार्यावसृज्येताम्, एकविंशत्यास्तुवतैकशफाः पशवोऽसृज्यन्त, त्रयोविंशत्यास्तुवत क्षुद्राः पशवोऽसृज्यन्त, पञ्चविंशत्यास्तुवतारण्याः पशवोऽसृज्यन्त, सप्तविंशत्यास्तुवत द्यावापृथिवी व्यैतां, नवविंशत्यास्तुवत वनस्पतयोऽसृज्यन्त, एकत्रिंशतास्तुवत प्रजा असृज्यन्त, त्रयस्त्रिंशतास्तुवत भूतान्यशाम्यन्" (शु० य० १४।२८–३१) इत्यादि। अत्रैकतः प्रारभ्य त्रयस्त्रिंशत्पर्यन्तानां संख्यानामुपसंग्रहः सृष्ट्युत्पत्तिश्च श्रूयेते। तत्र सांख्या एवमाशेरते—मासानन्तरेणर्तूनामसंभवाद् "नभश्च नभस्यश्च वार्षिकावृतू" "इषश्चोर्जश्च शारदा ऋतू" इतिवन्माससंख्यानेनैवर्तुसंख्यानस्य गतार्थत्वात्ते पृथङ्न गणनीयाः। एवमेकयेति त्रिंशतेति द्विः प्रजासृष्टिः श्रूयते। तत्रान्यतरा हेया। एवमेकविंशत्यैकशफानां पशूनां सृष्टिः श्रूयते सापि त्याज्या। ग्राम्यारण्यपशूनां सृष्टावेव तेषां गतार्थत्वात्। त्रयस्त्रिंशतेति त्याज्यमेव सृष्टिप्रसङ्गबहिर्मुखत्वात्तस्य। एवं च पञ्चविंशतिपर्यन्ता एव संख्या अवशिष्यन्ते। ताश्च पञ्चविंशतेस्तत्त्वानामुपलक्षिकाः। तदिदं प्रत्याचष्टे भगवान्व्यासः, संख्योपसंग्रहादपि न सांख्यमतं सिद्धम्। कुतः? नानाभावात्—एकस्यैव वस्तुनः प्रकारान्तरेण पुनःपुनरुपवर्णनात्। तथाहि प्रजासृष्टावेव ब्रह्मक्षत्रशूद्रार्याणां सृष्टेर्गतार्थत्वादपि पृथक्पृथक् चतुर्णां सृष्टिः समुपवर्णिता। एवं च निरर्थकतया तेषां त्याज्यतया त्वन्मनीषितसंख्याहानिरेव। यदि तेषां सृष्टेः पृथग्गणना तवाभिमता तर्ह्यृतूनां मासानां वनस्पतीनां चापि पृथग्गणनायां न कोपि प्रत्यवायः। एवं च तवाभिमतसंख्यातिरेकः सम्पद्येत। तदेवाहातिरेकाच्चेति ॥१।४।११॥

किंच—

प्राणादयो वाक्यशेषात् ॥१।४।१२॥

यदि माध्यन्दिनानामुपर्युक्ताः श्रुतयः सृष्टिप्रक्रियायां प्रधानवादिसंमततत्त्वसंख्यानुसन्धाने च प्रवृत्तास्तर्हि प्राणादीनामपि सृष्टिर्वक्तव्या प्रकरणान्न्याय्याच।

तदेव कथयति सूत्रकारो वाक्यशेषादिति। प्राणादयो वाक्यशेषा एव। प्राणादीत्यत्रादिपदेनेन्द्रियाण्यन्तःकरणानि च संग्राह्याणि। एतेषामपि तत्र पाठः कर्तव्यः। एवं च भज्येतैव त्वत्संख्यागणनाभिमान इति भावः ॥१।४।१२॥

किं च,

ज्योतिषैकेषामसत्यन्ने ॥१।४।१३॥

अन्नेनपाठेसति ज्योतिषा सह तस्य पाठोप्यपेक्षितव्य इत्येकेषामाशयः। अयं भावः। "एकत्रिंशतास्तुवत प्रजा असृज्यन्त यवाश्चायवाश्चाधिपतयः" इत्यत्र यवादीनामन्नानामपि सृष्टिवर्णनम्। तच्च प्रधानवादिना पञ्चविंशतिसंख्योपग्रहलोभेन परित्यक्तम्। एवं चान्नसृष्टिरप्यपेक्षिता। ज्योतिःशब्देन सूत्रे सूर्याग्निविद्युदादीनां संग्रहः। तेषामपि सृष्टिर्वक्तव्या। एवं च "असति अन्ने" ज्योतिषा सहान्नसृष्टिन्यूनता प्रदर्शनीया। ज्योतिःसृष्टिन्यूनतान्नसृष्टिन्यूनता च प्रदर्शनीयेति तात्पर्यम्। तथा कृते तु संख्यातिरेक एव स्यात् ॥ १।४।१३ ॥ इति संख्योपसंग्रहाधिकरणम् ॥३॥

(अथ कारणत्वाधिकरणम् ॥४॥)

वेदेषु ब्राह्मणेषूपनिषत्सु च बहूनि बहुप्रकाराणि जगत्कारणानि श्रूयन्ते। तत्रासतोपि जगदुत्पद्यमानं श्रूयते। एवं चासत्प्रधानं जगत्कारणं वैदिकशब्देनैव सिद्धमिति पिष्टमेव पुनः पेष्टुं निष्प्रयोजनमपि सप्रयोजनमिव मत्वालमनलसो भगवान् व्यास आह—

कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः ॥१।४।१४॥

"तपसस्तन्महिनाजायतैकम्" (ऋ० १०।१२९।२) इत्यनेन पसतो जगदुत्पत्तिः, "रोहितो द्यावापृथिवी जजान" (अथ० १३।१।६) इत्यनेन रोहितात्सूर्यात्, "ऋतं च सत्यं चाभीद्धात्तपसोध्यजायत" (ऋ० १०।१९०।१; तै० आ० १०।१।१३) इत्यनेनापि तपसः, "त्वामिमा ओषधीः सोम विश्वास्त्वमपो अजनयंस्त्वं गाः। त्वमाततन्थोर्वन्तरिक्षं त्वं ज्योतिषा वि तमो ववर्थ ॥"

(शु० य० ३४।२२) इत्यनेन सोमात् , "स प्रजापतिः सुवर्णमात्मन्नपश्यत्तत्प्राजनयत्" (अथ० १५।१।१) इत्यनेन प्रजापतेः "ततो विराडजायत विराजः" (शु० य० ३१।५) इत्यनेन विराजः, "सुभूः स्वयम्भूः प्रथमोन्तर्महत्यर्णवे। दधे ह गर्भमृत्वियं यतो जातः प्रजापतिः ॥" (शु० य० २४।६३) इत्यनेन स्वयम्भुवः, "प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परि ता बभूव" (शु० य० १०।२०) इत्यनेन प्रजापतेः, "आत्मन आकाशः सम्भूतः" (तै० उ० २।१) इत्यनेनात्मनः, "असद्वा इदमग्र आसीत्। ततो वै सदजायत" (तै० उ० २।७) इत्यनेनासतः, "बृहन्तो नाम ते देवा येऽसतः परिजज्ञिरे।" (अथ० १०।७।२५) इत्यनेनाप्यसतः, "प्रजापतिर्वा इदमग्र आसीदेक एव सोकामयतान्नं सृजेय प्रजायेयेति स प्राणेभ्य एवाधि पशून्निरमिमीत" (शत० ७।४।२।६) इत्यनेन च प्रजापतेर्जगतः प्रसवः श्रूयते। अत्रासतोपि जगदुत्पत्तिः श्रूयते तेनासतः प्रधानस्य जगत्कारणत्वं विवादानाकुलितमितिमतिमपसारयितुमाहाचार्यः कारणत्वेनेत्यादि। सूत्रार्थस्तु—आकाशादिषु कार्येषु कारणत्वेन सर्वत्र यथाव्यपदिष्टोक्तेः = व्यपदिष्टमनतिक्रम्य यथाव्यपदिष्टम्। यथाव्यपदिष्टमुक्तिर्यथाव्यपदिष्टोक्तिस्तस्याः। सर्वत्रैव समानव्यपदेशः। एकस्मिन्मन्त्रे यथा व्यपदेशस्तमनतिक्रम्यैवान्येष्वपि मन्त्रेषु श्रौतवाक्येषु च। आकाशादिशब्दानामपि ब्रह्मपरकत्वमेवेति गतेष्वधिकरणेषु हस्तदर्पणायितमिति नास्ति नानाकारणत्वदर्शनम् ॥ १।४।१४ ॥

उक्तोत्तरमेव विस्पष्टयति—

समाकर्षात् ॥ १।४।१५ ॥

समाकर्षणं समाकर्षस्तस्मात्। आकाशादिषु शब्देषु यत्र यत्र भ्रान्तिर्विभिन्नकारणतायास्तत्र सर्वत्र ब्रह्मण एव समाकर्षः। स च सामर्थ्यादेव। सामर्थ्यं त्वसकृत्प्रत्यपीपदाम। "असद्वा इदमग्र" इतिश्रुतौ नासतः सदुत्पत्तौ तात्पर्यम्। "बृहन्तो नाम ते देवा" इत्यत्रापि तथैव। तत्रासच्छ्रुतिस्तु तदानीं सृष्टेः प्राग्ग्राहकाभावाद्ब्रह्मणोग्राह्यत्वेन ब्रह्मवादिन्यैव विज्ञेया। अथवा सदित्यस्य सत्तामात्रमित्यर्थः। अस्तीत्यसत्। अल्लोपाभावस्तुच्छान्दसः। ततश्चासत इत्यस्य

सत्तामात्रेण वर्तमानाद्ब्रह्मणः सत्नामरूपादिमद्वस्तुजातमजायतेति श्रुत्यर्थोऽन्यत्र निरूपितस्तत्रैव द्रष्टव्यः ॥१।४।१५॥

ननु किं कारणं तत्र तत्र श्रुतैराकाशादिशब्दैः परं ब्रह्म समाकृष्यत इत्याह—

जगद्वाचित्वात् ॥ १।४।१६ ॥

जगद्वाचित्वाद्ब्रह्मणः। ब्रह्मैव जगद्रूपेण परिणतमिति वा ब्रह्मण एव विवर्तो जगदिति वा वेदान्तिनां संस्था। अतो जगद्ब्रह्मैव ब्रह्मणो रूपं वेत्युभयं समानम्। तेन जगद्ब्रह्मणोः कार्यकारणभावत्वेऽपि समानार्थकतया जगदन्तर्गताकाशादिशब्दैर्ब्रह्मैव बोध्यत इति तदेवाकृष्यते मोक्षप्रकरणेषु ॥ १।४।१६ ॥

अत्रैव विवदमानानुद्दिश्याह—

जीवमुख्यप्राणलिङ्गान्नेति चेत्तद्व्याख्यातम् ॥ १।४।१७ ॥

सूत्रे प्राणशब्द उपलक्षणविधया सर्वदेवाकाशादिभौतिकपदार्थानाह। जीवश्च मुख्यप्राणश्चेति जीवमुख्यप्राणौ। तयोर्लिङ्गम्। तस्मात्। जीवलिङ्गान्मुख्यप्राणलिङ्गाच्च न ब्रह्मणः समाकर्षो युक्त इति चेत्, तद्व्याख्यातम् = दत्तोत्तरं हि तत्। तथाहि, नोच्यते सर्वत्रैव जीवलिङ्गं मुख्यप्राणादिलिङ्गं च नादर्तव्यमिति। वाक्यार्थनिर्णयनयप्रणेतृणि च लिङ्गानि षट्। तानि च "उपक्रमोपसंहारावभ्यासो पूर्वता फलम् अर्थवादोपपत्ती चेत्येवंरूपाणि। यत्रोपक्रमोपसंहारयोरानुकूल्यं न व्याकुलीभवति स एवार्थोऽर्थनीयः। उपासनाप्रकरणेषु जीवमुख्यप्राणग्रहणे विरोधप्रदर्शनेन यथा तत्परिहाणं परमात्मनश्चोपादानं स सर्व एव प्रकारः कृतसत्कारः पूर्वम् ॥ १।४।१७ ॥

अत्रैव जैमिनिमप्यनुकूलयति—

अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके ॥ १।४।१८ ॥

तत्तद्वाक्येषूपासनाप्रसङ्गेषु जीवप्राणाकाशादिशब्दजातमन्यार्थम्। तत्तच्छब्दानां मुख्यार्थपरित्यागपूर्वकतद्भिन्नार्थग्रहणार्थमित्याशयः। तत्तच्छब्दमुख्यार्थभिन्नत्वं च ब्रह्मण एव। अल्पशक्तिं जीवं जडं च परित्यज्यापरिच्छिन्नानन्तशक्ति-

रजडः परमात्मोपासनीय इति तत्तच्छ्रुत्याशय इति जैमिनिर्मन्यते स्म। तुर्जीव-मुख्यप्राणग्रहण पक्षप्रक्षेपार्थः। एवम्, एके—अन्ये चाप्याचार्या भगवद्व्यासा-त्पूर्वभवास्तत्समसमया वा मन्यन्ते स्म। कस्मात्त एवं मन्यन्ते स्मेति चेत्, प्रश्न-व्याख्यानाभ्याम्। प्रश्नश्च व्याख्यानं च ताभ्याम्। विदुषां प्रश्नोत्तरैरेवं ज्ञायतेजडः परमात्मैवोपासनीय इति। वेदेष्वपीदृशः प्रश्नोत्तरवाचः श्रूयन्ते। तथाहि, "यस्य शिरो वैश्वानरश्चक्षुरङ्गिरसोऽभवन्। अङ्गानि यस्य यातवः स्कम्भं तं ब्रूहि कतमः स्विदेव सः॥" (अथ० १०।७।१८) इत्यादिभिर्बहुभिर्मन्त्रैः स्कम्भजिज्ञासा कृता। अत्र शिरश्चक्षुराद्यङ्गानि जीवलिङ्गानि सन्ति तथाप्येतद्वर्णनमन्यार्थमेव। तथैवात्र उत्तरम्। "स्कम्भे लोकाः स्कम्भे तपः स्कम्भेऽध्यृतमाहितम्। स्कम्भ त्वा वेद प्रत्यक्षमिन्द्रे सर्वं समाहितम्॥" "इन्द्रे तप इन्द्रेऽध्यृतमाहितम्। इन्द्रं त्वा वेद प्रत्यक्षं स्कम्भे सर्वं प्रतिष्ठितम्॥" "नाम नाम्ना जोहवीति पुरा सूर्या-त्पुरोषसः। यदजः प्रथमं सं बभूव स ह तत्स्वराज्यमियाय यस्मान्नान्यत्परमस्ति भूतम्॥" (अथ० १०।७।२९-३१) इत्यादि। शिष्यजिज्ञासामुपशमयता भगवता मन्त्रर्षिणा प्रत्युत्तरितं यत्र लोका स्थिता यत्र तपो यत्रर्तं समाहितं तमेवे-न्द्रपदवाच्यं स्कम्भं जानीहीति। इन्द्रे लोको इन्द्रे तप इति वदतेन्द्रत्वं स्कम्भा-न्नातिरिच्यत इति स्फोरितम्। अन्ते च, यत् अजः परमात्मा प्रथमं सं बभूव प्राकट्यमाप स ह तत् सर्वमिदं च स्वराज्यं स्वशासनमियाय प्राप यस्मात्पर-मेश्वरादन्यत्परमत्यन्तं भूतं सत्यं न अस्तीतिबोधयता तेन पृष्टः स्कम्भो ब्रह्मैवेति स्पष्टीकृतम्। मुख्यप्राणलिङ्गं यथा—"विश्वान्देवानिदं ब्रूमः सत्यसन्धानृतावृधः। विश्वाभिः पत्नीभिः सह ते नो मुञ्चन्त्वंहसः॥" (अथ० ११।६।१९) इति। अत्रेन्द्रियरूपान्विश्वान्देवान् प्रार्थयमाना उपासका "यूयं विश्वाभिः सर्वाभिः पत्नीभिर्वृत्तिरूपाभिः सह नोस्मानंहसः पापान्मुञ्चन्तु मोचयन्त्विति"। यद्यप्यत्र मुख्यप्राणादिलिङ्गमेव तथापि जडदेवान्संप्राथ्र्य न कदापि किञ्चित्प्राप्तव्यम्। तेन परमात्मप्रार्थनमेवात्र रहस्यम्। हे परमात्मंस्त्वमेतादृशानुकम्पयानुकम्प्यान-स्मान्यतः पापवृत्तिरूपाभिः पत्नीभिः सहास्माकमिन्द्रियदेवाः पूता भवन्त्वि" त्यत्र तात्पर्यम्॥ १।४।१८॥

अत्रैवान्तिमं हेतुमुपन्यस्यति—

वाक्यान्वयात् ॥ १।४।१९ ॥

तत्र तत्र प्रयुक्तानां वाक्यानामन्वयो ब्रह्मण्येव भवति नान्यत्र । इदं सर्वमसकृत्पूर्वं बहुधा गीतम् ॥ १।४।१९ ॥ इति कारणत्वाधिकरणम् ॥ ४ ॥

(अथ प्रतिज्ञाधिकरणम् ॥ ५ ॥)

"योसावादित्ये पुरुषः सोसावहम्" (शु० य० ४०।१७) इत्यत्रादित्यान्तर्यामी यः स एवाहमस्मीति कथनेन लोकस्थितौ प्रतीयमानेपि जीवब्रह्मणोर्भेदे परमार्थतः प्रभातायामज्ञानतमिस्रायां जीवोपि शिवरूपतामेतीत्यभेद एव तयोः सिध्यति न यशस्विनायासेन साधितो भेद इत्यत्राश्मरथ्याचार्यस्य कस्यचिन्मतमाह—

प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः ॥१।४।२०॥

आश्मरथ्य आचार्यो मन्यते स्म "योसावादित्ये पुरुषः सोसावहम्" "तत्र को मोहः कः शोक एकत्वमनुपश्यतः" (शु० य० ४०।७) इत्यादिवेदवचनं प्रतिज्ञायाः सिद्धेर्लिङ्गम् । अयमाशयः । "वि ते मुञ्चामि रशनां वि योक्त्रं वि नियोजनम् । इहैव त्वमजस्र एध्यग्ने ॥" (अथ० ७।७८।१) इतिमन्त्रे जीवानुद्दिश्य परमात्मा प्रतिजानीते, हे अग्ने कर्मपारतन्त्र्येण बहुषु शरीरेषु गमनशील जीवात्मन, सर्वशक्तिसम्पन्नोहं परमेश्वरस्ते तव रशनां बन्धरज्जुं मुञ्चामि, तव योक्त्रं बन्धनं वि मुञ्चामि, तव नियोजनं "अस्मिन्देशेस्मिंश्च कालेस्यां च स्थितौ त्वयेत्थं वर्तितव्यम्" इतीदृशं मदाज्ञावर्तित्वं वि मुञ्चामि नाशयामि । इतः प्रारभ्य, अनन्यया भक्त्या परमेण वा ज्ञानेन विगलितबन्धः संस्त्वमिहैवास्मिन् शरीर एवाजस्रोविनाश्य एधि भवेति । जीवानां समाश्रितस्वाश्रयाणां बन्धनविच्छेदाय विधृतप्रतिज्ञो हि परमात्मा वरीवर्ति । तस्य तस्या एव प्रतिज्ञाया सिद्धेर्लिङ्गं-चिह्नमिदम् । महद्भिराराधितैः प्रयत्नैः परमात्मकृपारूपैर्ब्राह्मणोहं क्षत्रियोहं वैश्योहं शूद्रोहं हिन्दुरहं मुसलमानहं खैस्तोहं जारदुस्थोहं वैष्णवोहं शैवोहं शाक्तोहं मूर्खोहं पण्डितोहं धनवानहं निर्धनोहमन्धोहं काणोहं खञ्जोहं द्वैतवादे मे स्पृहाद्वैतवादे मे रतिरित्यादिसर्वबन्धविनिर्मुक्तो भवन्परमप्रसादमनुभवन्पराभवंश्च विषादं

सहसा सहास इव वदति जीवो "योसावादित्ये पुरुषः सोहमस्मि" "तत्र को मोहः कः शोक एकत्वमनुपश्यतः" इत्यादि । इदमधिवचनमेव लिङ्गं परमात्मनः प्रतिज्ञायाः पूर्तेरिति ॥१।४।२०॥

अत्रौडुलोमेर्मतमुपन्यस्यति—

उत्क्रमिष्यत एवम्भावादित्यौडुलोमिः ॥१।४।२१॥

"इहैव त्वमजस्र एधि" इत्युक्तायाः श्रुतेरिदं तात्पर्यम् । "न सायकप्रणुत्तानां पुनरस्ति निवर्तनम्" (अथ० ९।२।१२) इतिन्यायेन प्रारब्धवशादुत्पन्नस्य शरीरस्य कर्मफलभोगक्षयं यावदिहैव त्वमजस्र एधीत्याश्मरथ्यस्य वचो न रुचिरम् । न सायकप्रणुत्तानामितिवाक्यस्यासति प्रतिबन्धके न निवर्तनमित्यत्र तात्पर्यात् । शत्रुणा बलेन प्रक्षिप्तस्य बाणस्य प्रतिपक्षबाणेन विचूर्णितस्य लक्ष्यमनवाप्तस्यैव मध्ये विनाशदर्शनात् । अत उत्क्रमिष्यतः शरीरं परित्यज्य गमिष्यत एव एवम्भावः परमात्मैक्यभावो जीवस्येत्यौडुलोमिः । आश्मरथ्यस्य मते संसारे स्थितस्यापि जीवस्य ब्रह्मभावः । औडुलोमेश्च मते ज्ञानेन भक्त्या वा शरीरस्थितिहेतुभूतकर्मबन्धनविच्छेदादन्यस्य च कारणस्य शरीरस्थितेरनवस्थानाच्छरीरं परित्यक्ष्यत एव जीवस्यैवंभाव इति । न च त्रिषु कर्मसु मध्ये क्षीणेपि संचितेनुपश्लिष्टेपि क्रियमाणे प्रारब्धं त्ववशिष्यत एव । तद्बलान्नसायकप्रणुत्तानामितिवचनात् प्रारब्धबलेनेहैव स्थितस्य जीवस्य स्याद्ब्रह्मैक्यमितिवाच्यम् । ज्ञानस्य भगवत्या भक्त्याश्च माहात्म्यस्य त्वयाद्याप्यपरिचितत्वात् । तिमिरप्रकाशयोरिव सत्यासत्ययोरिव सदाचारदुराचारयोरिव कर्मफलज्ञानयोः सामानाधिकरण्याभावात् । न सायकप्रणुत्तानामित्यस्यासति प्रतिबन्धक इति शेषान्नीरोगो मार्गः ॥१।४।२१॥

काशकृत्स्नाचार्यस्य मतमुपहरति—

अवस्थितेरिति काशकृत्स्नः ॥१।४।२२॥

काशकृत्स्न आचार्यो मेने ब्रह्मभावे जीवस्यावस्थितिमात्रं भवति न तु ब्रह्मभावो भवति ततः शरीरं धारयतोपि जीवस्य "योसावादित्ये" इति "तत्र को मोहः कः शोक एकत्वमनुपश्यतः" इति चानुध्यानमनपहतम् । सुखदुःखहर्षशोकादिता-

नस्त्यानादिभानाभाव इति ब्रह्मभावावस्थितिः। सुखदुःखादीनामत्यन्ताभावो हि ब्रह्मभावः। अत एव योसावित्यत्रादोस्मदोरुभयोः प्रयोगः, एकत्वमनुपश्यत इत्यत्र वर्तमानप्रयोगश्चोपपद्यते ॥१।४।२२॥ इति प्रतिज्ञाधिकरणम् ॥५॥

(अथ प्रकृत्यधिकरणम् ॥६॥)

जीवानामुद्धरणं परमात्मप्रकृतिसिद्धमित्याह—

प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् ॥१।४।२३॥

प्रकृतिः स्वभावः। परमात्मनः प्रकृतिरेवैषा स्वाश्रयाश्रितजीवखेदच्छेदविधानं नाम। कुतो ज्ञायत एतत्? प्रतिज्ञादृष्टान्तानुपरोधात्। अनुपरोधोनुरोधः। प्रतिज्ञानुरोधाद्दृष्टान्तानुरोधाच्च। उक्ता हि प्रतिज्ञा "वि ते मुञ्चामि रशना" मित्यादिना। उपस्थाप्यते च दृष्टान्तः। "न वि जानामि यदि वेदमस्मि निण्यः संनद्धो मनसा चरामि। यदा मागन् प्रथमजा ऋतस्यादिद्वाचो अश्नुवे भागमस्याः॥" (अथ० ९।१०।१५) इति। कोहमस्मीति न जानामि। कर्मभिरज्ञानेन वा बद्धो मनसा नीतो यत्र तत्र संचरामि। यदा सौभाग्याद्दतस्य परमसत्यस्य प्रथमजा प्रथमोत्पादको मा आगमन् मामागमन्मां प्राप्तः, आत्, इत् = तदैवास्या वाच आश्वासनगिरो भागं, कश्चिदंशमश्नुवेनुभवामीत्यस्यार्थः। रक्षणं प्रतिज्ञायोपेत्य च स आश्वासयति जीवानित्यनेन मन्त्रेण प्रख्यापयति वेदः। "योसावादित्ये" इति "तत्र को मोहः कः शोक" इत्यादिवचनं च दृष्टान्तरूपेण संग्राह्यमिति ॥१।४।२३॥

अपरं हेतुमाह—

अभिध्योपदेशाच्च ॥१।४।२४॥

अभिध्याभिध्यानं चिन्तनं चिन्तनफलस्वरूपं रक्षणं च। परमात्मा स्वशरणागतानभिध्यायति चिन्तयति रक्षतीत्यस्योपदेशोपि श्रूयते। तथा हि—"ऋभुश्चक्र ईड्यं चारु नाम विश्वानि देवो वयुनानि विद्वान्। ससस्य चर्म घृतवत्पदं वेस्तदिदग्नी रक्षत्यप्रयुच्छन्॥" (ऋ० ३।५।६) इति। ऋभुर्मेधावी विश्वानि सर्वाणि वयुनानि प्रशस्यानि कर्माणि विद्वाञ्जानानो देवः परमात्मा ईड्यं प्रशस्यं नाम जीवं चक्रे। नम्यत इति नाम। निघण्टौ जलनामसु नामशब्दः पठितः। वेर्व्याप्तस्य

ससस्य सुतस्य शान्त्यावस्थितस्येत्यर्थः। तस्य पदं प्रतिपत्तव्यं चर्म रूपं घृतवत्प्रकाशवदस्ति। सोग्निः परमात्मा इत् परमात्मैव तत् नाम जीवजातमप्रयुच्छन्नप्रमाद्यन्नविस्मरन् रक्षति पालयतीत्यर्थः। अनेनापि परमात्मप्रकृतिः प्रकीर्तिता। अप्रमाद्यन्नेव स शरणागतान्सततं रक्षतीत्युपदेशादपि ज्ञायते तस्य प्रकृतिस्तथाभूतेति ॥१।४।२४॥

इतोपि तस्य तादृशी प्रकृतिः—

साक्षाच्चोभयाम्नानात् ॥१।४।२५॥

उभयेषां जीवजडानामाम्नानमुभयानाम्नानम्। तस्मात्। उभयेषां किमाम्नातम्? साक्षात्। साक्षात्तस्य परमात्मनः सम्बन्धः। उभयेषां जडाजडानां तेन ब्रह्मणा सह सम्बन्धस्याम्नानादितिसूत्रार्थः। यस्य येन सम्बन्धः स सर्वदा तं परिरक्षन्येव। अनादिकालतः परमात्मना सम्बद्धत्वाज्जडाजडयोः स एव रक्षक इति भावः। "शृण्वन्तु विश्वे अमृतस्य पुत्रा आ ये धामानि दिव्यानि तस्थुः" (ऋ० १०।१३।१) इतिमन्त्रेण सर्वेषां जीवानां तत्पुत्रत्वाम्नानाच्चापि स सर्वदा जीवरक्षायै कृतप्रतिज्ञ इत्यर्थः ॥१।४।२५॥

परमात्मना सह जडाजडयोः कथं सम्बन्ध इत्याह—

आत्मकृतेः ॥ १।४।२६ ॥

आत्मनः कृतिरात्मकृतिस्तस्याः। जडाजडौ परमात्मन एव कृतिः। कृती रचना। परमात्मनैवोभयो रचितत्वाज्जन्यजनकरूपः सम्बन्ध इति भावः ॥१।४।२६॥

ननु संभवत्येव नामरूपात्मकस्य जडस्य परमात्मरचितत्वं नित्यस्य जराजन्मादिरहितस्य जीवस्य च तत्कथं संभवेदित्याह—

परिणामात् ॥ १।४।२७ ॥

स्थितिपरिवृत्तिर्हि परिणामः। सा च न स्वातन्त्र्येण स्वाभाव्येन वा, कर्मफलभूतदेहद्वारेणैव। देवदत्तदेहेवस्थितः स कदाचिद्बालो देवदत्तः कदाचिद्युवा देवदत्तः कदाचिच्च वृद्धो देवदत्तः। जातो देवदत्तो रुग्णो देवदत्तो मृतश्च देवदत्तः। स एव

देवदत्तः कदाचिद्यज्ञदत्तो भवत्ति कदाचिच्च विष्णुदत्तो भवति। एवमेकस्या स्थितेः स्थित्यन्तरं देहद्वारेण गच्छन्निह स परिणामं प्राप्नुवन्निव निर्दिश्यते। एतादृशपरिणतिकारणं परमात्मैवेति ॥ १।४।२७ ॥

इतोप्युभयोस्तस्य कृतित्वम्—

योनिश्च हि गीयते ॥ १।४।२८ ॥

"सतश्च योनिमसतश्च विवः" इतिवेदमन्त्रेण सदसतोरुभयोर्जडाजडयोः परमात्मैव योनिः कारणमिति गीयते ततो निश्चीयते तयोस्तस्य कृतित्वमिति ॥ १।४।२८ ॥ इति प्रकृत्यधिकरणम् ॥ ६ ॥

(अथ सर्वव्याख्यानाधिकरणम् ॥ ७ ॥)

एतेन सर्वे व्याख्याता व्याख्याताः ॥ १।४।२९ ॥

इति श्रीमद्रामानन्दाचार्यैः श्रीमद्व्यासमहर्षिभिः प्रणीते
वेदान्तदर्शने प्रथमेध्याये चतुर्थः पादः

एतेनैतावता ग्रन्थेन पादचतुष्टयेन सर्वे व्याख्यातेभ्य आकाशादिशब्देभ्योवशिष्टा ये शब्दास्तेपि व्याख्याताः। अल्प एव व्याख्याताः। दिग्दर्शनमात्रमेतत्। अनयैवदिशान्येपि जीवमुख्यप्राणलिङ्गकाः शब्दा उपासनाप्रकरणेषु व्याख्येया इत्यनुशासनम्। व्याख्याता व्याख्याता इत्यभ्यासोध्यायान्तेध्यायं समापयतीतिशम् ॥ १।४।२९ ॥ इति सर्वव्याख्यानाधिकरणम् ॥ ७ ॥

यथाशक्ति यथाभ्यासं यथाविद्याविभूति वा।
एतन्मया कृतं भाष्यं विदुषां तोषमावहेत् ॥ १ ॥
ज्ञानतन्तुव्यवच्छित्त्यै नो मया शीलितः श्रमः।
तस्मादत्र प्रवेशोस्तु ज्ञानोत्कर्षाभिलाषिणाम् ॥ २ ॥
सतां विद्यावतां प्रत्नरत्नमाहात्म्यवेदिनाम्।
पवित्रेषु करेष्वेतन्मया भाष्यं समर्प्यते ॥ ३ ॥
पूर्वजैर्यत्कृतं सत्यं तदेवेतिधियान्विताः।
दूषयन्तु न पत्त्राणि ग्रन्थस्यैतस्य दुष्करैः ॥ ४ ॥

दुर्विदग्धा जगच्छर्ममर्मवेधपरायणाः ।
मा ग्रन्थं स्प्राक्षुरेतं ते हन्त पण्डितमानिनः ॥ ५ ॥

अन्तरं ये न पश्यन्ति मानवा धनधर्मयोः ।
शक्नुवन्ति न विज्ञातुं रहस्यं रस्यमस्य ते ॥ ६ ॥

घटं भित्त्वा पटं छित्त्वा रासभारोहणेन वा ।
चिख्यापयिषवो ये स्वाँस्तेभ्यो दूरान्नमोस्तु मे ॥ ७ ॥

सुगन्धिकुसुमाकीर्णं लतामण्डपमण्डितम् ।
पुरीषप्रेप्सया नूनं पुरीषाशी विवक्षति ॥ ८ ॥

तत्रैव महतां भव्यभाग्यभाजां विपश्चिताम् ।
प्रवृत्तिः केवलं शान्तिसौन्दर्यानुबुभूषया ॥ ९ ॥

यियासते मे नवले वर्त्मनि स्खलते क्वचित् ।
दयालुभिर्विशेषज्ञैः करालम्बः प्रदीयताम् ॥१०॥

जयन्तु ते महात्मानः सुधियामग्रगामिणः ।
येषां मनसि सर्वस्वमौदार्यं संप्रवर्धते ॥११॥

जयन्तु शिरसा धार्या गुरुपादरजःकणाः ।
प्रतीक्षन्ते हि साहाय्यदानावसरमत्र ये ॥१२॥

इति सर्वतन्त्रस्वतन्त्र-परमहंसपरिव्राजक-स्वामिश्री-
भगवदाचार्यमहाराजैः प्रणीते वेदान्तदर्शनवैदिकभाष्ये

प्रथमेध्याये चतुर्थः पादः ॥

प्रथमोध्यायः समाप्तः

दृष्टिक्षेपोविधेयः —

पृष्ठ ८१ सूत्र १।२।१३ अनन्तर उपपत्तेः

स्थाने अन्तर उपपत्तेः इति ज्ञेया ।

पृष्ठ १३४ सूत्र १।४।२ सूक्ष्मं तु तदर्त्हेवात्

स्थाने सूक्ष्मं तु तदर्हत्वात् इति ज्ञेया ॥

वेदान्तदर्शनस्य प्रथमाध्यायस्य
सूत्रसूचीपत्रम्

ॐ

श्रीकाशीपण्डितसभया "पण्डितराजे" त्युपाधिसम्मानितैः

सर्वतन्त्रस्वतन्त्र–परमहंसपरिव्राजकाचार्य-

स्वामिश्रीभगवदाचार्यपण्डितराजैः

प्रणीतेन

वैदिकभाष्येण

समलङ्कृतम्

श्रीमद्भगवद्व्यासपादप्रणीतम्

ब्रह्मदर्शनम्

(द्वितीयोध्यायः)

प्रकाशक :-

स्वामी रामचरित्राचार्य व्याकरणाचार्य

श्रीराममन्दिर

मोटी हवेलीकी पोल

दरियापुर, अहमदाबाद-१

मुद्रक :-

वैद्यराज स्वामी श्रीत्रिभुवनदासजी शास्त्री

श्रीरामानन्दप्रिंटिंग प्रेस

कांकरियारोड

अहमदाबाद-१

धन्यवादः

सौराष्ट्रान्तर्गतसायलानगरस्थित–श्रीलालजीमहाराजमठाधीश-"श्रीवैष्णवमार्तण्ड" महान्तस्वामिश्रीमयारामदासमहानुभावाना-मौदार्येणायमध्यायो ब्रह्मदर्शनस्य मुद्रितोभूदिति भूयोभूयः स-धन्यवादं तेभ्यो बहु धारयामः प्रार्थयामहे च किमप्यनन्तशक्ति-सम्पन्नं तत्त्वं ते सर्वदैवैतादृशसत्कार्यसम्पादने नितरां निरता भवेयुरिति। पण्डितराजस्वामिश्रीभगवदाचार्यः

राजनगर सोसाइटी
अहमदाबाद–७
मई १९६१ ई०

'पण्डितराज" स्वामी श्रीभगवदाचार्यजी महाराजके रचित अन्य संस्कृत ग्रन्थोंकी नामावलि—

१–रामानन्ददिग्विजयः
२–भारतपारिजातम्
३–पारिजातापहारः
४–पारिजातसौरभम्
५–सामवेदसंस्कारभाष्यम् (सम्पूर्ण)
६–यजुर्वेदसंस्कारभाष्यम्
७–पुरुषसूक्तभाष्यम्
८–भगवद्गीताभाष्यम्
९–दशोपनिषद्भाष्यम् (प्रेसमें)
१०–भगवत्स्तोत्राणि – – – –

हिन्दी ग्रन्थ

(१) स्वामी भगवदाचार्य (प्रथमभाग)
(२) ,, ,, (द्वितीयभाग) इस भागमें वेदोंके विषयोंपर शङ्कासमाधान हैं।
(३) ,, ,, (तृतीयभाग) इसमें निम्नलिखित ग्रन्थोंका समावेश हुआ है—

१–रहस्योद्घाटन, २–श्रीराममन्त्रराजपरम्परा, ३–सिंहावलोकन, ४–तत्त्वोद्बोधनमीमांसा, ५–परम्परापरित्राण, ६–प्रस्तुप्रसङ्गभङ्ग, ७–तत्त्वप्रकाश, ८–श्रीसम्प्रदाय और अस्पृश्यस्पर्श, ९–त्रिरत्नी (विशिष्टाद्वैतवादका तत्त्वत्रय) १०–श्रीसम्प्रदायरक्षा (संस्कृत) ११–श्रीसम्प्रदायरक्षा (हिन्दी) १२–विभूतिधारणविचार, १३–आर्यावर्तका गुरुत्व।

सब ग्रन्थोंके मिलनेका पता—

स्वामी रामचरित्राचार्यजी व्याकरणाचार्य
राम मन्दिर
मोटी हवेलीकी पोल, दरियापुर
अहमदाबाद—१

श्रीकाशीपण्डितसभया 'पण्डितराजे' त्युपाधिसम्मानितैः
सर्वतन्त्रस्वतन्त्र-परमहंसपरिव्राजकाचार्य-
स्वामिश्रीभगवदाचार्यपण्डितराजैः
प्रणीतेन वैदिकभाष्येण समलंङ्कृतम्

श्रीमद्भगवद्व्यासपादप्रणीतम्

ब्रह्मदर्शनम्

द्वितीयस्मिन्नध्याये प्रथमः पादः

ॐ जितमस्माकम्। उद्भिन्नमस्माकम्। ऋतमस्माकम्।
तेजोस्माकम्। ब्रह्मास्माकम् स्वरस्माकम्। इतिमङ्गलाचरणम्।

जयतां ब्रह्मस्वरूपे ते गुरूणां पादपादुके।
यत्कृपापारतन्त्र्येण सर्वविद्योदयो मम ॥१॥

जयन्तु मयि ता न्यस्ता गुरोराशीःपरम्पराः।
यासामनश्वरीं छायामाश्रितः श्रियमश्नुवे ॥२॥

कृपा यस्य मतेर्मायासन्तमसं व्यपोहति।
तमहं महसां राशिमाशिषे गुरुमाश्रये ॥३॥

व्यासस्य हृदयोद्भूता मधुरा मधुरेक्षणा ।
समर्था परमार्थाय भारती शरणं मम ॥४॥

कस्यां तिथौ दिने कस्मिन् कस्मिन्नक्षत्रसत्क्षणे ।
मनउन्माथिनी जाता हन्तेयं व्यासकन्यका ॥५॥

रूपमाधुर्यलावण्यसमताक्षमतावती ।
चक्षुरुन्मील्य दृष्टेयं केन नाक्षिमता सता ॥६॥

यैर्दृष्टा यैश्च नादृष्टा कीलितैरुभयैर्हृदि ।
तन्नामश्रुतिमात्रेण श्रिता भूधरकन्दराः ॥७॥

सहस्रैर्वत्सरैर्भूयो रसिकै रसलम्पटैः ।
लालितालिङ्गिता भुक्ता श्यामैवाद्याप्यसौ स्थिता ॥८

सम्प्रदायाग्रहग्राहग्रासदंशनिपीडिता ।
चिरेण व्यथते ब्रह्ममीमांसेयमनीश्वरी ॥९॥

तदुद्धाराय यत्नोयमादृतः प्रथमो मया ।
स्वातन्त्र्यपदवीं प्राप्य क्षणं श्वसितु सुन्दरी ॥१०॥

श्रीमद्भगवदाचार्यस्वामिनो यमिनो मम ।
वैदिकं भाष्यमेतत्स्यात्सम्प्रसादाय सद्धियाम् ॥११॥

अथ स्मृत्यधिकरणम्–१

स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्य-स्मृत्यनवकाशदोषप्रसङ्गात् ॥२।१।१॥

गतः प्रथमोध्यायः। निर्धारितं च तत्र ब्रह्मस्वरूपम्। निखिलाविद्याबन्धनविमुक्तमनन्तज्ञानरत्नमण्डलमण्डनप्रमण्डितं विदिताविदिताखिलजगदेककारणं सर्ववेदविद्वेद्यमनवद्यं ब्रह्मेत्युक्तम्। इदानीं ब्रह्ममीमांसापरपर्यायब्रह्मदर्शनप्रणयनानेहसं यावद्यावन्तः सिद्धान्ता वेदाननुकूलतयालोकेलोके वालोके प्रचरिताः प्रथिताश्चासंस्तेषां निरासायास्य द्वितीयाध्यायस्य समारम्भः। तत्र प्रथमे पादे प्रारम्भे कापिली गती रीतिश्च ब्रह्मविषये निरस्येते। यद्यपि सूत्रेषु कुत्रापि कपिलस्याभिधानं न दृश्यते दृश्यते च केवलं स्मृतिशब्दस्तथापि "एतेन योगः प्रत्युक्तः" (२।१।३) इतिसूत्रेण सांख्ययोगयोः पूर्वंप्रतिपन्नस्य सांख्यस्यैव ग्रहणं स्मृतिशब्देन कर्तव्यमिति निराबाधं बुद्धिं बध्नाति। संस्कारमात्रजन्यं ज्ञानमिति वा प्रत्यक्षबुद्धिनिरोधे तदनुसन्धानविषय इति वा मनोजन्येति वा लिङ्गदर्शनेच्छानुस्मरणाद्यपेक्षादात्ममनसोः संयोगविशेषात्पटुत्वाभ्यासादरप्रत्ययजनिताच्च संस्काराद्दृष्टश्रुतानुभूतेष्वर्थेषु विशेषानुस्मरणेच्छाद्वेषहेतुस्तदतीतविषया इति वा अनुभूत-

विषयासम्प्रमोष इति वा नात्र स्मृतिशब्दार्थः । "श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृति" रितिमनूक्तलक्षणलक्षितापि न सा, किन्तु महर्षिव्यासानेहस्सु प्रसिद्धा ये श्रुतिग्रन्था ऋग्यजुस्सामाद्याख्यास्तदितरा वेदाविरुद्धाः सर्वे ग्रन्था सर्वाणि वा वचनानि वेदाविरुद्धानि स्मृतिशब्दवाच्यानीति । एवं च व्याससमयप्रसिद्धानि सांख्यमार्गानुयायिनां महाभारते संगृहीतानि वचनान्यपि स्मृतिशब्दानुगतानि । तथा चात्र स्मृतिशब्देन कापिलं सांख्यमतमेव ग्रहीतव्यम् । सर्वेषां ब्रह्ममीमांसाभाष्यकाराणामस्मत्पूर्वजानामप्यत्रैवाग्रहसंग्रह इति न तत्र तं विरोद्धुं निरोद्धुं वा कमपि ससेतुं हेतुं पश्यामः । तत्र ब्रह्म जगत्कारणमिति वैदिका मन्यन्ते । प्रधानमेव जगत्कारणमिति सांख्याः । वैदिकानामयमाशयः—कारणं त्रिविधम्—निमित्तमुपादानं सहकारि चेति । परिणामयोग्यमुपादानकारणम् । यथा मृत्तिका परिणामयोग्यतां वहन्ती घटस्योपादानकारणतामवगाहते । उपादानस्य यत्किञ्चिद्वेषेण परिणमयितृ निमित्तकारणम् । यथा कुलालो घटस्य निमित्तकारणतां धत्ते । कार्योत्पत्तिं प्रति यद्यदुपकरणं तत्सहकारिकारणतां पुष्णाति । जगतस्तु त्रिविधमपि कारणं ब्रह्मैवेति वेदवादः । ब्रह्मैव सूक्ष्मचिदचिद्विशिष्टवेषेणोपादानं भवति । 'अहं गर्भमादधाम्योषधीष्वहं विश्वेषु भुवनेष्वन्तः । अहं प्रजा अजनयं पृथिव्यामहं जनिभ्यो अपरीषु पुत्रान् ॥" (ऋग्० १०।१८३।३)। अत्रादधामीत्यस्यादधानीत्यर्थः । लोडर्थे लट् । अथवा तिष्ठतु

वर्तमानकाल एव। संकल्पपूर्विका हि क्रियाणां प्रवृत्तिः। "आदधामीति अजनयमिति च क्रियापदद्वयस्यापि संकल्पपूर्वकत्वात्पूर्वं लोडर्थप्रवृत्तेन्र्याय्यत्वात् जगदुत्पादनसंकल्पवेषेण तदेव निमित्तं भवति, ज्ञानशक्त्यादिविशिष्टवेषेण सहकारीति प्रसिद्धः पन्थाः। ब्रह्मणो जगदुपादानत्वे परिणममानस्य तस्य विकारापत्त्या निर्विकारत्वं विरुद्ध्येतेति चेन्न। चिदचिद्विशिष्टस्य ब्रह्मणो जगद्रूपेण परिणामेऽपि विशेष्ये ब्रह्मणि विकाराभावात्। शरीरविकारो न शरीरिणं विकारतामापादयति। तत्र परिणामस्तु विशेषणद्वारैव भवति। विशेषणगता दोषा न विशेष्यं स्पृशेयुः। विशिष्टस्वरूपेण विकाराश्रयत्वं ब्रह्मण इष्टमेव। न चैकस्यैव ब्रह्मणो निमित्तकारणत्वमुपादानकारणत्वं च न संघटते विरोधादिति वाच्यम्। तैस्तैरुपायैः सुखादीनामुत्पादयितरि जीवात्मन्युभयकारणत्वस्य दर्शनाद्विरोधाभावात्। तत्र सांख्याः प्रत्यवतिष्ठन्ते—न ब्रह्मकारणकं जगदिति। ब्रह्मणो निमित्तोपादानकारणत्वाङ्गीकारे ब्रह्मणि विकारापत्तिर्दुर्वारा। किं च जगदुपादानतापि ब्रह्मणि न सिध्येत्तस्यैव भवन्मते जगतो निमित्तत्वात्। यद्यस्य निमित्तं भवति न तत्तस्योपादानतां वहते। आम्। नैष दोषः। विशेषणद्वारैव विकारस्य स्वीकारान्न विशेष्ये ब्रह्मणि विकारदोषापत्ति रति पूर्वमेवापीपदाम। यथोर्णनाभेः स्वशरीरभूतविशेषणद्वारा तन्तुरूपकार्यं प्रत्युपादानत्वेपि न स्वरूपविकारदोषस्तं स्पृशति तद्वत्सर्वशरीरिणि ब्रह्मण्यपि वेदितव्यम्।

न च शरीरशरीरिभावो ब्रह्मण औपनिषदो न वैदिक इति वाच्यम् । "तदेवाग्निस्तदादित्यस्तद्वायुः" (यजु०३२।१) इत्यादिवेदवचनेनापि तथैवोपपादनात् । अथेदानीं सूत्रं व्याख्येयम्—सांख्या आहुर्यदि ब्रह्मण एव जगत्कर्तृत्वं भव-दभिमतं स्मृत्यनवकाशदोषप्रसङ्गः । वेदानामेव सर्वत्र प्रमाण-त्वाङ्गीकारे स्मृतीनामनवकाश एव स्यात् । एवमनवकाशरूप-दोषस्य प्रसङ्गः स्यात् । अनवकाशत्वात्स्मृतिप्रामाण्येन न ब्रह्म-कारणत्वं सिध्यति सिध्यति च प्रधानकारणत्वमिति । निषिध्यंस्तन्मतं सूत्रशेषांशे चाह, इति चेन्न । त्वदुक्तं न सदुक्तमिति । कस्मात् ? अन्यस्मृत्यनवकाशदोषप्रसङ्गात् । अन्या-सां स्मृतीनामनवकाशरूपदोषप्रसङ्ग उत्पद्येत । बह्वीनां स्मृतीनां बाधनापेक्षयैकस्या एव स्मृतेर्बाधनस्य न्याय्यत्वम् । ननु ब्रह्म-दर्शने ब्रह्मप्रतिपादकानां ब्रह्मकर्तृत्वप्रतिपादकानां च वेद-वचनानामेव प्रामाण्यमपेक्षितं कथमत्र स्मृत्यनवकाशदोष-विचारणा कथं चान्यस्मृत्यनवकाशदोषप्रसञ्जनमिति । यदि स्यात्स्मृतीनां वेदप्रामाण्यादधिकं प्रामाण्यं तदैवास्य सूत्रस्यौ-चित्यं सिध्येत् । न च तथाभिमतं वैदिकानां वेदैकपक्ष-पातिनाम् । कथं तर्ह्यस्य सूत्रस्योत्थानमिति । उच्यते । दर्शनग्रन्थे दर्शनस्यापि माहात्म्यमितिधियैवास्याध्यायस्य प्रारम्भः । स्मृतिशब्देन दर्शनान्येवात्रापेक्षितानि । क्वचिदन्येपि वेदेतरा ग्रन्था अपेक्षिताः स्युरिति । अथवा स्मृतिश्चिन्तनम् । तत्त्वचिन्तका जगतः कारणं ब्रह्मेति न संमन्वते । तेषां चिन्त-

नस्यानवकाशः प्रसज्येत । यदि ग्रन्थप्रामाण्यमनुगृह्यैव दर्शनशास्त्रे स्यात्पदविन्यासो दर्शनत्वं विहन्येत । दर्शनं च तत्त्वज्ञानसाधनमुच्यते । एवं चान्यस्मृत्यनवकाशदोषप्रसङ्गादित्यस्याप्यन्यदर्शनानवकाशदोषप्रसङ्गादित्येवार्थो वेदितव्यः । सन्ति चेतराणि दर्शनानि यैर्नाभिमन्यते जगतः प्रधानं कारणमिति । अथवा द्वितीयव्याख्यानस्य नात्रावसरः । तत्त्वचिन्तका ब्रह्मणो जगत्कारणत्वं स्वीकुर्वीरन्नवेत्यत्र न चिन्ताचक्रचालनचातुरी दर्शयितव्या । इदं तु ब्रह्मदर्शनम् । वैदिको ब्रह्मशब्दो वैदिकमेव ब्रह्म । वेदेन यदुच्यते तस्यैवास्माकमभिमतत्वेन वेदबाह्यानां तर्काणां सर्वथोपेक्षैवात्रेति मन्तव्यम् ॥२।१।१॥

इतरेषां चानुपलब्धेः ॥२।१।२॥

नेदं मन्तव्यं कपिलेनैव स्थापितेन पथा वेदार्थः संकलनीय इत्याह—इतरेषामिति । इतरेषां च विदुषां विचारे जगत्कर्तृत्वेन प्रधानस्य स्वीकृत्यनुपलब्धेरपि नैकस्य कपिलस्य मतमनुग्राह्यमिति । अत्र सूत्रे चकारोप्यर्थकः ॥२।१।२॥

(इति स्मृत्यधिकरणम्—१)

अथ योगप्रत्युक्त्याधिकरणम्—२

एतेन योगः प्रत्युक्तः ॥२।१।३॥

बहुषु विचारेषु सांख्ययोगयोरैक्यदर्शनात्तदभिन्नाभिन्नस्य तदभिन्नत्वमितिन्यायाच्च सांख्यसिद्धान्त इव योगासिद्धान्तोपि प्रत्याख्यातो वेदितव्यः । सांख्यस्मृतिरिव योगस्मृतिरपि विषयेत्र नादरणीयेति । "निमित्तमप्रयोजकं प्रकृतीनां वरणभेदस्तु ततः क्षेत्रिकवत्" (योग०४।३) इत्यादिसूत्रेषु सांख्यानुसरणं दृष्ट्वा प्रत्युक्तिरेषा वेदितव्या ॥२।१।३॥

(इति योगप्रत्युक्त्यधिकरणम्–२)

अथ विलक्षणत्वाधिकरणम्—३

न विलक्षणत्वादस्य तथात्वं च शब्दात् ॥२।१।४॥

ब्रह्मणो जगत्कारणत्वमपाकुर्वन्नाह—ब्रह्मणो जगत्कारणत्वं नानुसन्धेयम् । कुतः ? अस्य विलक्षणत्वात्–अस्य जगतो विलक्षणत्वात् । कारणानुगतं हि कार्यं भवति । यदि ब्रह्मणोजगत्कारणत्वमास्थीयते कारणगुणपूर्वकस्य हि कार्यदर्शनस्यासंग्रहः स्यात् । लोके हि दृश्यते घटरूपे कार्ये मृत्तिकारूपकारणस्यानुगतत्वम् । कटकादिषु च कार्येषु सुवर्णानुगतत्वम् । नात्र तथा । कारणं ब्रह्म चेतनम् । कार्यं च जगदचेतनम् । कारणं ब्रह्मानन्दस्वरूपम्, जगच्च निरानन्दम् । अतः कार्यकार-

णयोर्वैलक्षण्यदर्शनान्न ब्रह्मणो जगत्कारणत्वमुपपद्यते। न केवलं प्रत्यक्षदर्शनेनैव कार्यकारणयोर्वैलक्षण्यं, शब्दादपि तथात्वं वैलक्षण्यमनुसन्धेयम्। चोप्यर्थेत्र। शब्दश्च "ऋतं च सत्यं चाभीद्धात्तपसोऽध्यजायत। ततो रात्र्यजायत ततः समुद्रो अर्णवः। समुद्रादर्णवादधि संवत्सरो अजायत।" (ऋ० १०। १९०।१-२) "तदिदास भुवनेषु ज्येष्ठं यतो जज्ञ उग्रस्त्वेषनृम्णः।" (ऋ० १०।१२०।१) "मा नो हिंसीज्जनिता यः पृथिव्या यो वा दिवं सत्यधर्मा जजान। यश्चापश्चन्द्रा बृहतीर्जजान" (ऋ० १०। १२१।९) इति ॥२।१।४॥

अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम् ॥२।१।५॥

अभिमानिभिरपि व्यपदेशा भवन्ति। यथा, "अग्ने नय सुपथा राये अस्मान्" (ऋ० १।१८९।१) इत्यत्र "त्वं नो अग्ने वरुणस्य विद्वान्देवस्य हेडोवयासिसीष्ठाः" (ऋ० ४।१।४) इत्यत्र च नाग्निशब्देन जडोऽग्निर्ग्रहीतव्यः किन्तु जडाभिमानी ब्रह्मरूपः स वेदितव्यः। तुना सर्वत्रिधाग्रहो निवर्त्यते। अभिमानिव्यपदेशे हेतुमाह—विशेषानुगतिभ्यामिति। विशेषादनुगतेश्च। विशेषो विशेषणम्। अनुगतिरनुप्रवेशः। विशेषणं यथा—"अग्निर्देवता वातो देवता चन्द्रमा देवता" इत्यादि (यजु० १४।२०)। अत्र देवता विशेषः। विशेष्यमित्यर्थः। अग्निर्विशेषणम्। अङ्गत्यङ्गयति नयति देशमभिलषितमित्यर्थः। अनुप्रवेशो यथा—"वृषा मही रोदसी

आ विवेश" (ऋ० ३।६१।७।)। अत्रावेशोनुप्रवेश एव। एवं चाचेतना अपि पदार्थाश्चेतनपदार्था इव निर्दिश्यन्ते। वस्तुतस्तु प्रधानमेव जगत उपादानं न चेतनं ब्रह्मेति ॥२।१।५॥

दृश्यते तु ॥ २ । १ । ६ ॥

सांख्योक्तिं निराकुर्वन्नाह दृश्यते त्विति। तुशब्द उक्तार्थनिरासार्थः। यदुक्तं त्वदभिमताज्जगदुपादानभूताद्ब्रह्मणो विलक्षणं हि जगत्, तेन ब्रह्मणो जगदुपादानत्वं न सम्भवतीति, अयुक्तं हि तत्। कस्मात्? विधर्मणोरपि पदार्थयोः कार्यकारणदर्शनात्। तथा हि—जडं हि माक्षिकम्। तदुपादानभूतः क्रिम्यादिस्तु न जडः। जडाजडयोर्वैलक्षण्यं स्पष्टमेवेति जडादजडस्योत्पत्तिर्नानुपपन्ना। ननु न तत्र वैलक्षण्यम्। कृमिशरीरं जडमेव। जडादेव शरीराज्जडस्य मधुन उत्पत्तिः। अथ गोमयाद्वृश्चिकोत्पत्तिः। किमत्रानुपपन्नम्? गोमयं हि जडम्। वृश्चिकश्चाजडः। न हि किमप्यनुपपन्नम्। अत्राप्युभयमेव जडम्। गोमयमपि जडं वृश्चिकशरीरमपि जडम्। नास्ति वैलक्षण्यदर्शनम्। अस्त्येवात्र वृश्चिकोत्पत्तौ वैलक्षण्यम्। किं तत्? दधिगोमयमिश्रणादेव वृश्चिकोत्पत्तिर्न केवलाद्दध्नो न वा केवलाद्गोमयात्। एवं मधुमक्षिकाभ्य एव मधुन उत्पत्तिर्न तु सामान्यमक्षिकादिभ्यः। इदमेव वैलक्षण्यम्। ब्रह्मविलक्षणस्य जगतो ब्रह्मोपादानत्वे न कापि क्षतिः ॥२।१।६॥

असदिति चेन्न प्रतिषेधमात्रत्वात् ॥ २ । १ । ७ ॥

कारणं ब्रह्म कार्यं च जगदिति तावकीनं मतम् । चेतनं हि ब्रह्म जगच्चाचेतनम् । द्रव्यान्तरत्वमत्र सिध्यति । न हि द्रव्यान्तरे द्रव्यान्तरस्य कारणत्वमवतिष्ठते । न हि गोधूमाच्चणका जायन्ते चणकाद्वा गोधूमाः । ब्रह्म निरवयवम् । जगच्च सावयवम् । एवं च निरवयवाद्ब्रह्मणः सावयवजगदुत्पत्तिं साधयता त्वयासतः सदुत्पत्तिः साधिता भवति । इति चेत्, न । प्रतिषेधमात्रत्वात् । नास्माभिरसतः सदुत्पाद्यते । सतोवासदिति । केवलं सालक्षण्यनियमं निषेधामः । कार्यकारणयोर्न नियमेन सालक्षण्यमपेक्षते । कण्टकहीनादपि बीजात्सकण्टको वृक्षो जायत एव । सुगन्धरहितादपि बीजात्सुगन्ध्यरविन्दं जायत एव। न हि बीजरूपे गोधूमे यवे वा दन्दशूकाः सत्त्वैरेवावलोक्यन्ते । एवं च कार्यकारणयोः सालक्षण्यमेवापेक्षितमिति नियमस्य प्रतिषेधः । सत्यपि वैलक्षण्ये कार्यकारणयोर्व्यापारसिद्धिः । अत एवाचेतनानि भूतानि चेतनं ब्रह्म स्वविलक्षणजगदाकारेण परिणमयमानं तिष्ठतीति सिद्धान्तो प्रतिषेध्य एव। किञ्च शरीरशरीरिणां चिदचिद्ब्रह्मणामभेदत्वेनापि परिणममानं शरीरभूतमचित्तत्त्वं न शरीरि ब्रह्म विकारयितुमर्हम् । उष्णे जले प्रक्षिप्तास्तन्दुला एव पच्यन्ते न तु लोहकणा अपि । यथा तन्दुललोहकणयोरग्निना तप्यमाने जले प्रक्षिप्तयोस्तण्डुल एव विक्लित्यादिविकारा

नायसकणे तथाविकार्ये ब्रह्मणि विकारस्यासम्भवेन विकार्यायामचित्येव विकारो नान्यत्र ॥ २ । १ । ७ ॥

पुनराशङ्कते—

अपीतौ तद्वत्प्रसङ्गादसमञ्जसम् ॥ २ । १ । ८ ॥

अपीतिरप्ययः प्रलय इत्यर्थः । तद्वत्प्रसङ्गात्—तद्वत् प्रसङ्गः स्यात् । तद्वदिति किम्? उच्यते । प्रलये यथा प्राकृतानां वस्तूनां नाशो वा विपरिणामो वा भवति तथैव ब्रह्मणोपि स्यात् यदि स्वविलक्षणजगदाकारेण विपरिणमते तदिति मतं स्यात् । तथा चासमञ्जसम् = ब्रह्मस्वरूपनिर्णायकानां वेदवाक्यानां तव पक्षे सामञ्जस्यं न स्यात् । अयं भावः — "हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्। स दाधार पृथिवीं द्यामुतेमाम्" (ऋ०१०।१२१।१) "य इद्राजा जगतो बभूव । य ईशे अस्ये द्विपदश्चतुष्पदः" (ऋ० १०।१२१।३) "येन द्यौरुग्रा पृथिवी च दृढा येन स्वः स्तभितं येन नाकः" (ऋ० ।१०।१२१।५) ततो देवानां समवर्ततासुरेकः" (ऋ० ।१०।१२१।७) इत्यादिषु वाक्येषु ब्रह्मणः सृष्टेः पूर्वमप्यवस्थानस्योपवर्णनात्, त्वन्मते च प्रलये तस्यापि प्रलयस्वीकारात्सर्वमसमञ्जसमेव स्यात् । कार्यकारणयोरैक्यस्वीकारात्स्यादेवायं महान्दोषः । किञ्च तथा स्वीकारे कार्यगतदोषा ब्रह्मण्यपि स्युः । दोषग्रस्तं

ब्रह्म मुमूर्ष्वेव स्यात्। "तं मर्ता अमर्त्यं घृतेनाग्निं सपर्यत अदाभ्यं गृहपतिम्" (ऋ० १०।११८।६) इत्यादिना तच्च विरुध्यते। किञ्च त्वदुक्तः शरीरशरीरिभावो ब्रह्मणो न वेदसहः। अकायमव्रणमित्यादिना ब्रह्मणः शरीरित्वनिषेधात्। शरीरेण हि कोपि शरीरी भवति। शरीरं हि भोगायतनं भवति। न भवितुमर्हति नित्यस्याचिन्त्यस्य ब्रह्मणो भोगः कश्चित्। चेष्टेन्द्रियार्थाश्रयः शरीरमित्युच्यते। तदपि न। काय एवेन्द्रियाणामवस्थानम्। स एव नास्ति। अकायेतिश्रुतेः। किञ्च शरीरं द्विविधं भवति योनिजमयोनिजं चेति। ब्रह्मणो योनिजशरीरस्वीकारे तव मते महान् वज्रपातः। अयोनिजशरीराङ्गीकारेपि तस्य न त्वच्छिवम्। ब्रह्मणि जनिधात्वर्थस्याप्रसरात्। जाते जायमाने जनिष्यमाणेऽनित्ये हि जनिप्रयोगः। न नित्ये। न जायते ब्रह्म। ननु जायत एव ब्रह्म रामोवतीर्णः कृष्णोवतीर्णश्चेति। अवतारकथेयम्। न वयमवतारकथां कथयामो, ब्रह्म विचारयामः। अथातो ब्रह्मजिज्ञासेत्येव प्रतिज्ञावाक्यम्। ननु ब्रह्मापि जायत एव। "ब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेन आवः॥" (अथ० ४।१।१) "आ यो धर्माणि प्रथमः ससाद ततो वपूंषि कृणुषे पुरूणि। धास्युर्योनिं प्रथम आ विवेशा यो वाचमनुदितां चिकेत॥" (अथ० ५।१।२) इत्यादिमन्त्रवर्णात् इति चेन्न। जायमानं म्रियमाणं च नैव भवितु-

मर्हति ब्रह्म। तस्य नित्यत्वाज्जनिमृतिमतां चानित्यत्वात्। "अपाद् समभवत्" (अथ० १०।८।२१) "एको ह देवो मनसि प्रविष्टः प्रथमो जातः" (अथ० १०।८।२८) "पूर्णात्पूर्णमुदचति पूर्णं पूर्णेन सिच्यते।" (अथ० १०।८।२९) अन्ति सन्तं न जहात्यन्ति सन्तं न पश्यति" देवस्य पश्य काव्यं न ममार न जीर्यति" " (अथ० १०। ८।३२।) इत्यादिमन्त्राक्षरैर्ब्रह्मणो जनिमृत्यादेरभावसूचनात्। "अकामो धीरो अमृतः स्वयम्भू रसेन तृप्तो न कुतश्चनोनः। तमेव विद्वान्न बिभाय मृत्योः" (अथ० १०।८।४४) "ब्रह्म जज्ञानं प्रथमं पुरस्तात्" "धास्युर्योनिं प्रथम आ विवेश" इत्यादिवचननिकायस्तु सृष्टेरादौ शरीरवतो जीवसमूहस्य ब्रह्मज्ञानस्योपलब्धिं तस्य सर्वशरीरेषु व्यापकत्वं च प्रख्यापयति ॥ २ । १ । ८ ॥

पुनरुत्तरं पठति—

न तु दृष्टान्तभावात् ॥२।१।९॥

यत्त्वयाञ्जसासामञ्जस्यं प्रजोषितं तन्न तु। तत्तु न। कुतः? दृष्टान्तभावात्। विद्यते दृष्टान्तः। कस्मिन्नर्थे? एकस्यैव वस्तुनोवस्थाद्वये विद्यमानेपि न हि सर्वे गुणा दोषा वा सर्वे तदनुयन्ति। कश्च दृष्टान्तः? शृणु। चिदचिद्विशिष्टं हि ब्रह्म। चिच्चाचिच्चेति विशेषणद्वयं ब्रह्मणः। चिदचितौ ब्रह्मणः शरीरभूते। शरीरभूतयोस्तयोर्ब्रह्मणा सम्बन्धोपृथक्

सिद्धिरूपः। एवं च चिदचिद्रूपशरीरगता दोषा न ब्रह्मणि निर्दोषे कथमपि स्थानं लभन्ते। न वाचिद्गता दोषा जीवात्मानं स्पृशन्ति। न चायं सम्बन्धो न वेदानुमोदित इति वाच्यम्। "पुरुष एवेदं सर्वम्" (ऋ० १०।९०।२) इत्यनेन पुरुषसूक्त-मन्त्रेण पुरुष इति सप्तम्यन्तपाठेन चेतनाचेतनात्मकानां सर्वेषां वस्तूनां ब्रह्मण्यवस्थानप्रबोधनात्। तच्चावस्थानं न संयोगसम्बन्धेन, निराकारयोः पदार्थयोः संयोगसम्बन्धस्यास्वीकारात्। न च समवायसम्बन्धेन, समवायस्य सिद्धान्ते दूषितत्वात्। न वान्येन केनापि सम्बन्धेन। असम्भवात्। अतोपृथक्सिद्धिरूपः सम्बन्ध एवात्रागत्या ग्राह्यः। न च ब्रह्मणः शरीरात्यन्ताभावान्न तच्छरीरत्वकल्पनं न्याय्य-मिति वाच्यम्। 'वपुर्नु तच्चिकितुषे चिदस्तु समानं नाम धेनु पत्यमानम्। मर्त्येष्वन्यद्दोहसे पीपाय सकृच्छुक्रं दुदुहे पृश्निरूधः॥" (ऋ० ६।६६।१) इत्यत्र ब्रह्मशरीरोपवर्णनात्। न चाकायमव्रणमितिवाजसनेयिसंहिताविरोध इति वाच्यम्। तत्र लोकप्रसिद्धशरीरनिषेधात्। अत्र तु निवासयितृरूपशरीरोपवर्णनात्। यस्य चेतनस्य यद्द्रव्यं सर्वात्मना स्वार्थे नियन्तुं धारयितुं च शक्यं तच्छेषतैकस्वरूपं च, तत्तस्य शरीरमिति पूर्वेषां विशिष्टाद्वैतवादिनां डिण्डिमः। वस्तुतस्तु, अपृथक्सिद्धि-सम्बन्धेन यद्यत्र तिष्ठति तत्तस्य शरीरमिति विदुषां सम्प्रदायः ॥२।१।९॥

स्वपक्षदोषाच्च ॥२।१।१०॥

यदि ब्रह्मकारणवादो नाश्रयणीय आश्रयणीयश्च सांख्याभिमतप्रधानकारणवादस्तदा स्वपक्षे—प्रधानकारणवादपक्षे दोषः स्यात् । को दोषः ? निर्विकारस्य निष्क्रियस्य चेतनस्य सांनिध्यात्प्रधानं जगत्प्रवर्तयतीतिसांख्याभिमतम् । तत्र चेतनस्य सन्निधानं तु प्रधानस्य सार्वदिकमेव स्यात् द्वयोरेव तत्त्वयोः सार्वदिकत्वात् । एवं च सर्वदा जगतः प्रवृत्तिरेव स्यान्न तु निवृत्तिः । निवृत्त्यभावे वेदाभिमतजगत्प्रलयो न स्यात् । यदि किञ्चिद्विशिष्टं सन्निधानं हृदि निधीयते तर्हि वक्तव्यम् । यदि सिसृक्षाकालिकमेव संनिधानं संनिधत्से तर्हि तत्र वक्तव्यं सिसृक्षाया आश्रयः कः ? आत्मा वा प्रधानं वा ? त्वन्मत आत्मनो निष्क्रियत्वान्न तदाश्रयत्वम् । प्रधानस्य जडत्वाज्जडे च चेतनधर्मसिसृक्षाया एवासम्भवः । एवं च सृष्टिरेव न संभवेत् ॥२।१।११॥

तर्काप्रतिष्ठानादपि ॥२।१।११।

यदि कश्चनान्यस्तर्काननुसन्धीयतेऽत्र तदा तर्काणामप्रतिष्ठानादनियमनात्तर्को न तर्कणीयः। तर्काणामप्रतिष्ठानं तु विभिन्नमतानुयायिनां विभिन्नतर्कराशेर्दर्शनादेव सिध्यति । सर्वे पाक्षिकाः स्वपक्षं समर्थयितुमाश्रयन्त एव विभिन्नतर्कसमुच्चयम् । एवं च श्रौतब्रह्मकारणवाद एवाश्रयणीय इति विदुषां सुगमः पन्थाः ॥२।१।११॥

अन्यथानुमेयमिति चेदेवमप्य-
निर्मोक्षप्रसङ्गः ॥२।१।१२॥

अन्यथानुमेयं, यद्येकमनुमानं दूषितं प्रत्याख्यातं वा स्यादन्यथानुमास्यामः। यदि तदपि दूषितं स्यात्ततोप्यन्यथानुमास्यामः। भवतु नामानुमानपरम्पराप्रतिष्ठानं तत्र न वयं विरुन्ध्मः। अनुमानस्याप्यप्रतिष्ठानं तु स्यादेव। तदेवाह-अनिर्मोक्षप्रसङ्ग इति। अनुमानपरम्परातो मुक्त्यभावेन तत्त्वनिर्णयोपि न स्यात्। यत्नेनापि श्रमेणापि यः कोप्यर्थोनुमीयेत प्रतिपक्षैः स्वतर्कैः कुशलैर्दूषयिष्यत एवासौ। तस्मात् वेदविरोधितर्काणामनाश्रयणमेव वरमिति ॥२।१।१२॥

(इति ब्रह्मविलक्षणत्वाधिकरणम् ॥३॥)

(अथ शिष्टापरिग्रहाधिकरणम्—४)

एतेन शिष्टापरिग्रहा अपि
व्याख्याताः ॥२।१।१३॥

वेदविरोधितर्कप्रसरावरोधेन तत्तिरस्करणेन चान्ये सर्वेपि शिष्टापरिग्रहाः शिष्टा वेदानुयायिनः, तैर्न परिगृह्यन्ते ये ते शिष्टापरिग्रहा वैदिकाननुमता इत्यर्थः। अथवा शिष्टाः परिशिष्टाः काणादादयस्ते चापरिग्रहाश्च शिष्टापरिग्रहाः। अपि। एतेनावैदिकसांख्यस्मृतिनिराकरणेन व्याख्याता नादर्तव्या

इति भावः। वेदैकपक्षपातिभिर्वेदविरोधितर्का नाश्रयणीया न वादरणीया इति बादरायणतात्पर्यम् ॥२।१।१३॥

(इति शिष्टापरिग्रहाधिकरणम्—४)

(अथ भोक्त्रापत्त्यधिकरणम्—५)

भोक्त्रापत्तेरविभागश्चे-
त्स्याल्लोकवत् ॥२।१४॥

यदि ब्रह्म शरीरि जीवश्च शरीरम्, अनयोः शरीरशरीरिणोरविभाग एव स्यात्। एवं च भोक्त्रापत्तिः स्यात्। यथा जीवे भोक्तृत्वं भवति भावभोग्यवस्तुजातस्य तथा ब्रह्मण्यपि स्यात्। एतदेवाभेदफलम्। यथा वृक्षे शाखाः सन्ति शाखासु च पत्राणि पुष्पाणि च सन्ति। वृक्षशाखापत्रपुष्पाणामभेदे वृक्षे शुष्यति शाखाः पत्त्राणि पुष्पाणि च शुष्यन्ति, जीवति च वृक्षे शाखापत्त्रादीन्यपि जीवन्ति। अभेदस्यैतदेव माहात्म्यम्। नतद्युक्तम्। कथं न युक्तम्? शृणु। वृक्षाः शाखाः पत्राणि पुष्पाणि च न विधर्मत्वं भजन्ते। सर्वत्राचित्त्वं तु समानमेव। अयं पिप्पलवृक्ष इतिनिर्दिष्टे शाखादीनामपि निर्देशो भवत्येव। ब्रह्मेत्युक्ते न चितां न वाचितां बोधो जायते। चिद्ब्रह्मणोर्भेद एव चिदचिद्विशिष्टं ब्रह्म सिध्यति। ब्रह्म शरीरि चिच्छरीरम्। यथा जीवः शरीरगतैर्दोषैर्न लिप्यते तथा जीवगतैर्दोषैर्न शरीरि ब्रह्मावलिप्यते। जडेपि यदैकहस्ते

जाते वातदुष्टेपरोहस्तो निर्दुष्ट एव तिष्ठति तदा सर्वदोषकोषविरक्तस्य परस्य ब्रह्मणः का कथा ? न सर्वथा शरीरगतदोषाः शरीरिणमाक्राम्यन्ति । एकस्मिश्चक्षुषि दुष्टेपि निर्दुष्टमेवावतिष्ठतेपरं चक्षुः । दक्षिणं चक्षुरपि शरीरावयवो वाममपि तत्तथैव । एकस्य दोषेण नापरं भवति दुष्टम् । एकस्यैव शरीरस्यावयवोपरमवयवं न सम्पादयति दुष्टमदुष्टं वा कथं तर्हि गुणकर्मादिभिरैकान्तिकभेदं भजमाने ब्रह्मणि जीवगता दोषा वत्स्यन्ति नाम । अत्र दृष्टान्तमाह भगवान् सूत्रकारः—स्याल्लोकवदिति । यथा सिंहव्याघ्रोरगादिषु सत्स्वपि पृथिव्यां न पृथिवी तत्तद्दोषैर्दुष्टा भवति तथैव सत्स्वपि जीवदोषैर्न शरीरि ब्रह्म दुष्टं भवति । ननु चन्दनगन्धैः पृथिव्यपि सुगन्धिर्भवति । दुर्गन्धयुक्तैः पदार्थैः संसर्गमेत्य पृथिव्यपि दुर्गन्धिर्भवति तथैव दुरितपरीतजीवसंसर्गमेत्य ब्रह्मापि सदोषं स्यादेव । न स्यात् । गन्धमात्रं पृथिव्या धर्मः । न हि धर्मो धर्मिणं परित्यज्यान्यत्र स्थातुमर्हति । सुगन्धो वा स्याद्दुर्गन्धो वा स्यात् सर्वः पृथिव्या धर्मत्वेन व्याप्तः । न हि जीवो ब्रह्मणो धर्मः । अतो जीवकृतदोषैर्गुणैर्वा नितरामसम्बद्धमेवावतिष्ठते ब्रह्म । यथा मकरनिकरैः करालैर्व्यालैर्विविधपस्त्यैर्मत्स्यैश्च पूर्णेपि कासारे न कासारजलमपेयतामुपैति तथैव सुष्ठुदुःष्ठुकर्मकरालव्यालावकलितैरपि जीवैर्न भवति तत्तद्दोषावगुण्ठितं ब्रह्म । किं च चित्यचिति वा शरीरव्यवहारो न लोकवत् । धार्यत्वेन नियाम्यत्वेन

च जीवे ब्रह्मशरीरव्यवहारः। पुण्यपापजनितं हि शरीरं प्रत्यवायाय प्रतिष्ठते। न चिच्छरीरं न वाचिच्छरीरं शरीरिणो ब्रह्मणो यत्किञ्चित्कर्मफलबलाल्लभ्यं लब्धं वा भवति। अतो लौकिकशरीराद्विभिन्नमेवेदं जीवरूपं ब्रह्मशरीरमिति तु ध्येयमेवेति ॥२।१।१४॥

(इति भोक्त्रापत्त्यधिकरणम्—५)

(अथारम्भणाधिकरणम्—६)

**तदनन्यत्वमारम्भण-
शब्दादिभ्यः ॥२।१।१५॥**

शरीरशरीरिभावापन्नयोर्जीवब्रह्मणोरचिद्ब्रह्मणोर्वानन्यत्वं न काल्पनिकं बलाद्वा हठाद्वा सम्पादितं वेदितव्यम्। तत्र वैदिकं प्रमाणमपि तिष्ठत्येव। किं तत्? सावधानमनाः शृणु। आरम्भणशब्दादिभ्यः। आरम्भणशब्दादय एवात्र प्रमाणम्। तथा हि—"किं स्विदधिष्ठानमारम्भणं कत-मत्स्वित्कथासीत्। यतो भूमिं जनयन् विश्वकर्मा वि द्या-मौर्णोन्महिना विश्वचक्षाः॥ (ऋ० १०।८१।२) इतः पूर्व-मियमृग्विद्यते तत्र—"य इमा विश्वा भुवनानि जुह्वदृषिर्होता न्यसीदत्पिता नः। स आशिषा द्रविणमिच्छमानः प्रथमच्छ-दवराँ आ विवेश॥" (ऋ० १०।८१।१) अस्या ऋचोयमर्थः- यः परमेश्वर इमानि विश्वानि भुवनानि जुह्वत्सम्पादयन्निर्धि-

माण इत्यर्थः । हु दानादनयोः । अत्र सम्पादनमर्थः । न्यसीदत् तेष्वेव भुवनेषु व्याप्य संस्थित इति भावः । स च ऋषिः सर्वत्र गन्ता । ऋषो गतौ । होता सर्वेषां पदार्थानां दाता । नोऽस्माकं जीवानां पिता पालकश्चास्ति । स ह्याशिषेच्छया द्रविणं जगत् । द्रवति गच्छति विनश्यतीति द्रविणम् । इच्छमानो जगत्कर्तुं कामयमानः । प्रथमच्छत्प्रथमत एव सर्वेषां चेतनाचेतनानां छादयिता । व्यापकत्वेनेतितात्पर्यम् । अवरान्पश्चान्निर्मिताः स्थूलाचितस्तत्सम्बन्धेन स्थूलचितश्च आ विवेश विवेश इव । आ इवार्थे । इदमुक्तं भवति । ब्रह्म सर्वदा चित्स्वचित्सु च व्यापकश्चितोचितश्च तद्व्याप्याः सूक्ष्मावस्थायामपि स्थूलावस्थायामपि । जगत्सिसृक्षया सर्वान्पदार्थान् सृष्ट्वा सूक्ष्मा अचितः स्थूलत्वेन परिणमय्य तत्र संनिविष्टमिव ब्रह्म । सूक्ष्मावस्थावस्थितासु च तासु तदवस्थितमेव । स्थूलावस्थायामपि तयोस्तत्र प्रविष्टमिवासीदिति इवार्थमाहात्म्यम् । अत्र ब्रह्म व्यापकं चिदचितौ तद्व्याप्ये इत्युक्तम् । ततः परमेषां भुवनानां निर्माणे किं साधनं संनिहितमासीदिति प्रश्नमुत्थापयति—जगन्निर्माणकालेऽधिष्ठानं किमासीत् ? किमधिष्ठाय जगन्निरमाद्ब्रह्मेति । एवमारम्भणं कतमत्स्विदासीत् ? आरभ्यतेऽनेनेत्यारम्भणमुपादानमित्यर्थः । किमासीत् ? कथा आसीत् जगन्निर्माता कीदृगासीत् ? यतो यस्मिन्नधिष्ठाने स्थित्वा यच्च साधनमनुगृह्य विश्वकर्मा भूमिम् । भवतीति भूमिः । जायमानानखिलान्पदार्थानिति

यावत् । जनयन्नुत्पादयन् । विश्वकर्मा सर्वकर्मकुशलः । विश्व-चक्षाः सर्वद्रष्टा सर्वज्ञ इतियावत् । महिना माहात्म्येन । द्यां प्रकाशमानांल्लोकान् । वि और्णोत् सर्वत आच्छादितवान् । अत्रारम्भणशब्देन साधनजिज्ञासोत्थापिता । समाधत्ते च तामनयर्चा-"विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात् । स बाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जन-यन्देव एकः ॥ (ऋ० १०।८१।३॥) स परमात्मा बाहुभ्यां चिदचिद्भ्याम् । बाध्येते इति बाहू । सर्वं धमति निष्पाद-यति । जगन्निष्पादने हेतुमाह-पतत्रैरिति । पतनशीलैरिति । जीवकृतानि कर्माण्येव जगन्निष्पादने हेतुः । तानि कर्माणि भोगानन्तरं पत्राणि विनशनशीलानि सन्ति । स एको देवः परमेश्वरः द्यावभूमी दिवं च भूमिं च जनयंस्तिष्ठति । अत्रेदं तात्पर्यम्-आरम्भणमुपादानं जगतः किमासीदिति प्रश्नः । अचिदित्युत्तरम् । विश्वतश्चक्षुर्विश्वतोमुख इत्यादिपदैः सर्वेषां चक्षुषी मुखानि बाहू पादौ च तस्मिन्नेवासन्नित्युक्तम् । एतावता सर्वेषां चक्षुरादीनां ब्रह्मणो व्याप्यत्वमभिहितं भवति। जीवादयः सर्वे व्याप्याः व्यापकस्य ब्रह्मणः । व्याप्या एव शरीराणि कल्प्यन्ते । शरीरलक्षणं प्रागुक्तमेव । एतेन जीव-ब्रह्मणोः शरीरशरीरिभावः स्पष्ट एवेति । आदिशब्दात् "वेनस्तत्पश्यत्परमं गुहा यद्यत्र विश्वं भवत्येकरूपम् ।" (अथ० २।१।१) "स नः पिता जनिता स उत बन्धुर्धा-मानि वेद भुवनानि विश्वा । यो देवानां नामध एक एव तं

संप्रश्नं भुवना यन्ति सर्वा" (अथ० २।१।३) "इन्द्रो मह्ना महतो अर्णवस्य व्रतामिनादङ्गिरोभिर्गृणानः । पुरूणि चिन्नि तताना रजांसि दाधार यो धरुणं सत्यताता ॥ (ऋ० १०।१११।४) "इन्द्रो दिवः प्रतिमानं पृथिव्या विश्वा वेद सवना हन्ति शुष्णम् । महीं चिद् द्यामातनोत्सूर्येण चास्कम्भ चित्कम्भनेन स्कभीयान् ॥ (ऋ० १०।१११।५) इत्यादयः शतशः श्रुतयः संग्राह्याः ॥ २।१।१५॥

भावे चोपलब्धेः ॥२।१।१६॥

भावः कार्यम् । कार्ये कारणस्योपलब्धेः कारणादनन्यत्कार्यम् । घटः कार्यम् । तत्र तत्कारणभूतमृत्तिकोपलब्धेः । कटककुण्डलादि कार्यम् । तत्र तत्कारणभूतसुवर्णोपलब्धेः । ननु गोमयादिसंभृतौ वृश्चिकोत्पत्तिरिति सर्वेषामभ्युपगमः । कारणं गोमयादि, कार्यं च वृश्चिकः । नात्र कार्ये कारणस्य कथंचनानुभूतिर्भवति । सत्यं न भवत्यनुभूतिर्गोमयादेर्गोमयादिरूपेण । परन्तु गोमयाद्यपि पार्थिवमेव तत्त्वम् । एवं चादिकारणभूतायाः पृथिव्यास्तत्र परिज्ञानं भवत्येव । कार्ये उपादानकारणस्यैव प्रतीतेः स्वीकारेण धूमे निमित्तकारणभूताग्नेरप्रतीतावपि न दोषः । अथवा भवतु नामोपादानता वह्नेरेव धूमस्य । धूमेपि वह्नेरनुभवः । गृहदाहादिप्रसङ्गे दूरस्थानामपि लोकानां धूमेप्यौष्ण्यानुभवात् । अतिदूरं गते धूमे तु न भवत्यनला-

नुसन्धानम् । मध्ये वायुवेगेन धूमस्थानलतेजःप्रशमनात् । आर्द्रेन्धनवह्निसंयोगेन जायमानो धूमो वह्निकार्यतां भजते । यदि कार्यकारणयोरनन्यत्वमभिप्रेतं तर्हि कथं न मृद्धटे मृद्-बुद्धिः सुवर्णकटककुण्डलादिषु चेदं सुवर्णमिति बुद्धिः ? तत्रावस्थान्तरं हेतुः । मृद्धटे मृत्प्रतीतावपि घट इत्येव व्यवहारो न च मृदिति । कटकादिषु सुवर्णप्रतीतावपि कटक-मित्येव व्यवहारो न सुवर्णमिति । व्यवहार एवात्र कारणं न तु वस्तुपरिवृत्तिः । एवं च कार्यकारणयोरनन्यत्वमेव नान्यत्वम् ॥२।१।१६॥

सत्त्वाच्चापरस्य ॥२।१।१७॥

अपरं कार्यम् । अपरस्य कार्यस्य कारणे सत्त्वादपि कार्यकारणयोरनन्यत्वम् । यथा मृद्रूपकारणे घटरूपकार्य-व्यवहार एवं घटरूपकार्ये मृद्रूपकारणस्यापि व्यवहारः । लोके यथा मृद्धटमादाय जलमाहर्तुं जिगमिषते पुरुषायो-पदेशो भवति मृदियं सावधानेन जलमाहर्तव्यमिति । सौवर्णविभूषणविभूषितायै जनसम्मर्दे जिगमिषते बालायो-पदेशो भवति सावधानेन गन्तव्यमिदं सुवर्णमिति । वेदेपि यथा—किं स्विदासीदधिष्ठानमारम्भणं कतमदित्यादिप्रश्नस्य "विश्वतश्चक्षुरुत विश्वतोमुख" इत्युत्तरम् ॥२।१।१७॥

असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्य-शेषाद्युक्तेः शब्दान्तराच्च ॥२।१।१८॥

ननु असद्व्यपदेशोपि कार्याणां श्रूयते-यथा, "नासदासीन्नो सदासीत्तदानीं नासीद्रजो नो व्योमा परो यत्। किमावरीवः कुहकस्य शर्मन्नम्भः किमासीद्गहनं गभीरम्" (ऋ० १०।१२९।१) "नमृत्युरासीदमृतं न तर्हि .... (ऋ०।१२९।२॥) इति। तस्मान्न कार्ये कारणानुवृत्तिः। न। धर्मान्तरेण व्यपदेशात्-सत्त्वमसत्त्वं चेति द्वौ वस्तुधर्मौ। यदि घटो घटरूपेण नास्ति मृद्रूपेणास्ति च तदोच्यते घटो नास्तीति। कार्यनिषेधः क्रियते न तु कारणनिषेधः। सत्त्वदशायां घटस्य नामापि भवति रूपमपि। असत्त्वं कारणदशायां व्यवह्रियते। कारणदशायां-सूक्ष्मदशायां न भवति नाम न वा भवति रूपं वस्तुनः। अत एवमुक्तमृचा "न असदासीद्"-घटाभावो नासीदिति। "न सदासीत्" घटो नासीदिति च। अयं भावः। घटाभावो नासीदिति घटसूक्ष्मावस्था न परिह्रियते सूक्ष्मदशायां तु स आसीदेव। न सदासीदित्यनेन स्थूलावस्था परिह्रियते न सूक्ष्मावस्था। वाक्यशेषादपि मदुक्तिः सिध्यति। कश्च वाक्यशेषः? "कामस्तदग्रे समवर्तताधि मनसो रेतः प्रथमं यदासीत्॥" (ऋ० १०।१२९।४॥) "तिरश्चीनो विततो रश्मिरेषामधः स्विदासीदुपरि स्विदासीत्। रेतोधा आसन्महिमान आसन्स्वधा अवस्तात्प्रयतिः परस्तात्॥" (ऋ० १०।१२९।५॥) इति। युक्तेश्च। युक्तेरपि मदुक्तोर्थः सिध्यति। का च सा? इयं हि सा-घटकार-

कुलं गत्वाह कश्चिद्धटं देहि कार्यं ममास्तीति । घटं कुर्वाण एव घटकार आह नास्ति घट इति । सिद्धावस्थायां नास्तीत्येवास्य तात्पर्यं न तु तद्विपरीतायामपि । शब्दान्तराच्च । शब्दान्तरादपि मदुक्तोर्थः सिद्धः । किं तत् ? इदं हि तत् – "कामस्तदग्रे समवर्तताधि मनसो रेतः प्रथमं यदासीत् । सतो बन्धुमसति निरविन्दन् .... इति । (ऋ० १०।१२९।४।।) ।। २।१।१८।।

पटवच्च ।।२।१।१९।।

यथा कार्पासतन्तवः संयोगविशेषमनुभूय नामान्तरं कार्यान्तरं धर्मान्तरमवस्थान्तरं च भजन्ति तद्वद्ब्रह्मापि चिदचिद्विशिष्टं नामरूपकार्यधर्मावस्थान्तरं भजते । न चैवं सदपि तद्विकारि भवति । योग्यत्वादचिच्छरीरे हि ते विपरिणामा न तु शरीरिणि ब्रह्मणीति ।।२।१।१९।।

यथा च प्राणादिः ।।२।१।२०।।

निदर्शनान्तरमाह–यथा च प्राण एक एव सन्नपि व्यापारान्तरं निषेवमाणः प्राणापानव्यानोदानसमानेतिनामानि भजते तद्वद्ब्रह्मापि नित्यसिद्धमेकत्वं भजदपि स्वशरीरेणाचिद्रूपेण वैविध्यं भजते । अतः कारणाद्ब्रह्मणः कार्यस्य च जगतोनन्यत्वं न परिह्रियत इति ।।२।१।२०।।

(इति आरम्भणाधिकरणम् –६)

(अथ इतरव्यपदेशाधिकरणम्—७)

इतरव्यपदेशाद्धिताकरणा-
दिदोषप्रसक्तिः ॥२।१।२१॥

इतरस्य जीवस्य व्यपदेशाद् ब्रह्मभावव्यपदेशादित्यर्थः। अथवा जीवस्येत्येवाध्याहार्यम्। एवं च. जीवस्येतरव्यपदेशा-द्ब्रह्मव्यपदेशादेवोभयोरनन्यत्वं साध्यते। एवं तु सर्वज्ञस्य ब्रह्मण आत्मनो हितरूपजगदकरणमहितरूपजगत्करणं च, अन्ये चापि बहवो दोषाः प्रसज्येरन्। ब्रह्म तु सर्वज्ञमेव। जीवब्रह्मणोरभिन्नत्वे हितरूपमेव जगन्निर्मितं स्यान्नाहित-रूपम्। न हि स्वः स्वं पीडयितुमिच्छति। ततश्च सुखरूपस्य जगत एव निर्माणं स्यान्नासुखरूपस्य तस्येति ॥२।१।२१॥

अधिकं तु भेदनिर्देशात् ॥२।१।२२॥

सिद्धान्तयति। तुशब्दः पक्षव्यावर्तनार्थः। इतरस्माज्जी-वाद्ब्रह्माधिकमन्यत्। न हि ब्रह्मैव जीवः। न वा जीवो ब्रह्म। कुतः? भेदनिर्देशात्। शतशः श्रुतयो जीवब्रह्मभेदाभि-धायिन्यः सन्ति। तथा हि, "अग्ने नय सुपथा राये अस्मानि" त्यादि। भेदे सत्येवेयं श्रुतिश्चारितार्थ्यं भजेत। "विश्वानि देव सवितर्दुरितानि परा सुव। यद्भद्रं तन्न आ सुव।" "तस्य व्रतानि भूरिपोषिणो वयमुप भूषेम दम आ सुवृक्तिभिः॥" "वैश्वानर तव धामान्याचके येभिः

स्वर्विदभवो विचक्षण" (ऋ० ३।३।९-१०॥ इत्यादिभिर्वेदशब्दैरुभयोर्भिन्नत्वमभिधीयते ॥२।१।२२॥

अश्मादिवच्च तदनुपपत्तिः ॥२।१।२३॥

यथाश्मादयोचेतनपदार्था अत्यन्तवैजात्येन न ब्रह्मरूपतां प्राप्नुवन्ति तथा जीवस्याप्यत्यन्तविजातीयतया सर्ववित्सत्यकामसत्यसङ्कल्पादिगुणगणमण्डलमण्डितब्रह्मस्वरूपत्वसरूपतादीनामनुपपत्तिः । जीवब्रह्मणोर्वैजात्यं तु—"अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान् । युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम ॥" (ऋ० १।१८९।१) "तेजोसि तेजो मयि धेहि मन्युरसि मन्युं मयि धेहि ओजोस्योजो मयि धेहि०" (शु०य० १९।९) इत्यादिश्रुतिसहस्रैः प्रतिपादितम् । उभयोर्वैजात्यं तु न नित्यत्वचैतन्यत्वादिरूपेण किन्त्वज्ञत्वजनिमृतिमत्त्वादिरूपेण ॥२।१।२३॥

(इति इतरव्यपदेशाधिकरणम्—७)

(अथोपसंहारदर्शनाधिकरणम् —८)

उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि ॥२।१।२४॥

उपसंहारः समूहः । यस्य कस्यचित्कार्यस्य जननाय बहूनां कारणानां करणानां च समूहोपेक्षितः । ब्रह्म त्वेकमेव । एकेनोपसंहारसाध्यं कार्यं नैव भवेदिति न ब्रह्मणो जगत्स्रष्टृत्वमुपपद्यते । इति चेन्न । क्षीरवद्धि । हि यतः क्षीरवत्कार्यं सम्पद्यते । न हि सर्वेषामुपसंहारापेक्षा भवति । क्षीरमसहायमेव दधि जनयति । जलमसहायमेव हिममुत्पादयति । न च दुग्धं दधिभावायातञ्चनमपेक्षत एव, जलं हिमभावाय शैत्यमपेक्षत एवेति क्षीरोदाहरणं न पक्षं साधयितुं क्षमत इति वाच्यम् । दधिभावाय दुग्धस्य केवलस्यातञ्चनस्यैवापेक्षितत्वात् । हिमभावाय जलस्य केवलं शैत्यस्यापेक्षितत्वात् । एकस्यैवापेक्षा न बहूनाम् । कालादयस्तु केवलान्वयिनः । वस्तुतस्तु केवला शक्तिरेव ब्रह्मणोपेक्षिता सात्र तस्मिन्नस्त्येव । शक्तिबलेनैव सर्वा सामग्री क्षणेनैव तत्सन्निधावुपतिष्ठते । ततो नैकस्यापि वस्तुनः पारतन्त्र्यं ब्रह्मणि तिष्ठतीति ॥२।१।२४॥

देवादिवदपि लोके ॥२।१।२५॥

देवाः कुशलमनुष्याः । यथा कुशलमनुष्या लोके स्वापेक्षितानि कार्याण्यनायासेनाल्पायासेन वा साधयन्त्येवं सत्यसङ्कल्पं ब्रह्म स्वसमीहितं लोकमनायासेन संकल्पमात्रेण साधयतीति ॥२।१।२५॥

(इत्युपसंहारदर्शनाधिकरणम् –८)

(अथ कृत्स्नप्रसक्त्यधिकरणम् – ९)

कृत्स्नप्रसक्तिर्निरवयत्वशब्दकोपो वा ॥२।१।२६॥

यदि शरीरशरीरिभावमङ्गीकृत्य सत्यपि वस्तूनां बहुत्वे ब्रह्मण एकत्वमास्थीयते तदा कृत्स्नप्रसक्तिः। कृत्स्नं चिदचिद्विशिष्टं ब्रह्म कार्यत्वेन परिणतं स्यात्। अथ परिणामोचिदंशेभ्युपगम्यते चेन्निरवयवत्वशब्दकोपो भवेत्। अयमाशयः। चिदचिद्विशिष्टं हि ब्रह्म। चिदचितौ शरीरभूते ब्रह्मणः। ब्रह्मणि च शरीरित्वमास्थितम्। शरीरशरीरिणोरभेद इति मतम्। अनया रीत्या ब्रह्मण्यपि कार्यत्वप्रसक्तिः स्यादित्ययमेको दोषः। अपरश्चायम्–"स पर्यगाच्छुक्रमकायमव्रणमस्नाविरम् ...." (शु० य० ४०।८) इतिरीत्या ब्रह्मणोशरीरत्वं भगवद्वेदसिद्धम्। इदानीं चिदंशोचिदंशश्चेत्यवयवद्वयं स्वीक्रियते। एवं च निरवयत्वहानिर्वेदविरोधश्चेति दोषद्वयमुपतिष्ठते। शरीरे ह्यवयवा भवन्ति। यदि ब्रह्मणः शरीरमङ्गीक्रियते एतावतावयवित्वमपि सुतरां स्वीकृतं भवति। तथा च कायमव्रणं ब्रह्मेतिवादिनी श्रुतिर्व्याकुप्येत। इत्याक्षेपवचनम् ॥२।१।२६॥

समाधत्ते—

श्रुतेस्तु शब्दमूलत्वात् ॥२।१।२७॥

तुशब्दो दोषव्यावर्तकः। नेदमाक्षेपवचनं समीचीनतामञ्चति। कुतः ? श्रुतेः। श्रुतिस्तावद्ब्रह्मणो निरवयवत्वं

विचित्ररचनारचयितृत्वं चाह। तथा हि–“अकायमव्रणम्” (यजु० ४०।) “य इमा विश्वा भुवनानि जुह्वदृषिर्होता न्यसीदत्पिता नः” (ऋ० १०।८१।१) इति। सा च परमं प्रमाणम्। नन्वसम्बद्धार्थं प्रतिपादयन्ती श्रुतिरवहेलनीयैवेति चेत्। न। शब्दमूलत्वात्–कस्यापि विवादपङ्काकलितस्य विषयस्य निर्णयाय शब्द एव मूलं प्रथमं प्रमाणम्। यच्छब्द आह तदस्माकं प्रमाणम्। ब्रह्म हि सकलमपि सकलविलक्षणं वस्तु। विलक्षणत्वाद्विचित्रशक्तिमाहात्म्यं स नितरां सुतरां सन्धत्त इत्यत्र नतरामाशङ्का सेवनीयेति॥ २।१।२७॥

आत्मनि चैवं विचित्राश्च हि ॥२।१।२८॥

यद्यन्यस्य धर्मस्यान्यस्मिन्नारोपः क्रियते तदा चेतनेपि नित्य आत्मन्यचेतनत्वानित्यत्वादयो धर्माः कल्पिताः स्युः। उच्यते। न तथा। विचित्राश्च हि। सर्वेषु धर्मिष्ववस्थिता धर्मा विचित्रा हि दृश्यन्ते। अग्नावौष्ण्यम्, अप्सु शैत्यम्, वायौ स्पर्शनमित्यादि। न ह्यप्स्वौष्ण्यमग्नौ वा शैत्यं केनाप्यनुसन्धीयते। एवं निखिलवस्तुवैलक्षण्यं दधति ब्रह्मण्यन्येषां धर्माणां नावतारः सम्भवति। रूपं रूपं प्रतिरूपो बभूव तदस्य रूप प्रतिचक्षणाय। इन्द्रो मायाभिः पुरुरूप ईयते” (ऋ० ६।४७।१८) “रूपं रूपं मघवा बोभवीति मायाः कृण्वानस्तन्वं परि स्वाम्।” (ऋ० ३।५३।८) इति श्रुतिवचनान्यत्रानुसन्धेयानि॥ २।१।२८॥

स्वपक्षदोषाच्च ॥२।१।२९॥

स्वपक्षः पूर्वपक्षिपक्षः। पूर्वपक्षकर्तृपक्षे दोषात्। पूर्वपक्षकर्तृपक्षः प्रधानकारणवादः। ब्रह्म तु लौकिकवस्तुविजातीयम्। प्रधानं च लौकिकवस्तुसजातीयम्। तथा च लोकानुभूता दोषाः प्रधानेपि धावन्ति। किं च प्रधानं निरवयवम्। निरवयवात्सावयवस्य जगतः कथमपि न भवेदारम्भः। प्रधानं न निरवयवमिति तु स्थापयितुमशक्यम्। सत्त्वरजस्तमसां साम्यावस्था हि प्रकृतिः। साम्यवस्थायां सत्त्वादीनां निरवयत्वस्वीकारात्। ततश्च लौकिका दोषा प्रधाने दुर्निवाराः ॥२।१।२९॥

सर्वोपेता च तद्दर्शनात् ॥२।१।३०॥

नायं दोषो ब्रह्मकारणवादे। कुतः। सर्वोपेता हि ब्रह्मदेवता। सर्वोपेता सर्वकृतिकरणशक्तिसम्पन्ना। यद्यदिच्छति तत् तत्कर्तुं समर्थैव। कस्मादिदं विज्ञायते? तद्दर्शनात्। ब्रह्मप्रतिपादकेषु वेदमन्त्रेषु तथैव दर्शनात्। तथा हि "तमस्य द्यावापृथिवी सचेतसा विश्वेभिर्देवैरनुशुष्मावताम्। यदैत्कृण्वानो महिमानमिन्द्रियं पीत्वी सोमस्य क्रतुमाँ अवर्धत ॥" (ऋ० १०।११३।१॥) "प्र त इन्द्र पूर्व्याणि प्र नूनं वीर्या वोचं प्रथमा कृतानि। सतीनमन्युरश्रथायो अद्रिं सुवेदनामकृणोर्ब्रह्मणे गाम् ॥" (ऋ० १०।११३।८॥ "जज्ञान एव व्यबाधत स्पृधः प्रापश्यद्वीरो अभि पौंस्यं

रणम् । अवृश्चदद्रिमव सस्यदः सृजदस्तभ्नान्नाकं स्वपस्यया पृथुम्॥" (ऋ० १०।११३।४॥) इत्यादि ॥२॥१॥३०॥

विकरणत्वान्नेति चेत्तदुक्तम् ॥२।१।३१॥

भवतु नामैतत् । परं ब्रह्म तु विकरणम् । करणं ज्ञानकर्मेन्द्रियगणः । तद्विरहितम् । अकायमव्रणमित्यादि श्रुत्यनुरोधात् । अकरणात्कथं विलक्षणा सृष्टिः संजायेतेति चेन्न । तदुक्तम् । किमुक्तम् ? " भद्रो भद्रया सचमान आगात् स्वसारं जारो अभ्येति पश्चात् । सुप्रकेतैर्द्युभिरग्निर्वितिष्ठन् रुशद्भिर्वर्णैरभि राममस्थात्॥" (ऋ० १०।३।३॥) "प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव....॥ऋ० १०।१२१।१०॥ इतिवेदेनैव तत्कर्तृत्वस्योक्तत्वात् । वेदोक्तौ च न काचिद्विचिकित्सा कार्या । सर्वशक्तिमतो नास्ति कायकरणादीनामपेक्षा ॥२।१।३१॥

(इति कृत्स्नप्रसक्त्यधिकरणम्–९)

– ० –

(अथ प्रयोजनवत्त्वाधिकरणम्–१०)

न प्रयोजनत्वात् ॥२।१।३२॥

सृष्टेः पूर्वं केवलं ब्रह्मैवासीत् । ऋतं च सत्यं चाभीद्धात्तपसोऽध्यजायत" इत्यत्र तपश्शब्देन तपति प्रकाशते तापयति वा दुष्टानिति तपो ब्रह्म । सृष्टिः प्रयोजनवती । यस्य यत्किंचित्प्रयोजनं स्यात्तस्यैवेयं विसृष्टिः स्यात् । ब्रह्मणो

नास्ति केनापि वस्तुना किञ्चित्प्रयोजनमतस्तस्य नेयं सृष्टिरिति पूर्वः पक्षः ॥२।१।३२॥

लोकवत्तु लीला ॥२।१।३३॥

लोकवत्तु लीलाकैवलमित्येकं सूत्रमिति बहूनां पक्षः। तत्र विचार्यते लीलाकैवल्यमित्यस्य कोर्थ इति। लीलायाः कैवल्यमिति समासे न कश्चिदुपपन्नोर्थः। केवलैव कैवल्यमिति यद्यभिमतं स्यात्तर्हि लीला च तत्कैवल्यं चेति कर्मधारये विशेषणभूतकैवल्यपदस्य पूर्वनिपातोनिवार्यत्वं भजेत। यदि कैवल्यमेकत्वमिति शक्तिवादकाराणामाश्र-माश्रयेत तथापि नोद्धारः। लीलाया एकत्वमित्यर्थस्तदा सम्पद्येत स चात्राविवक्षित एव। पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यमितियोगिमतमप्यत्रायुक्तमेव। यदि निर्लेपस्य पुरुषस्य कैवल्येनावस्थानं कैवल्यमित्य-भिप्रेतं तर्ह्यवश्यं सूत्रं भिद्यते। अतो लोकवत्तु लीलेत्येकं सूत्रम्। कैवल्यमिति चापरम्। अनेनैव यथा सूत्रं व्याख्येयम्। तुः। केवलार्थः। केवलं लोकवल्लीलेति सूत्रार्थः। यथा लोकेबाला बाला वा मृदा घटं घटयन्ति विघटयन्ति च, न हि तत्र तेषां किञ्चित्प्रयोजनं क्रीडामन्तरेण दृश्यते। यथा च लोकानां श्वासप्रश्वासादिकाः क्रियाः प्रयोजना-नभिसंहिता एव सातत्येन प्रवर्तन्ते, यथा वा सप्तद्वीपां मेदिनीमधितिष्ठतोपि महाराजस्य केवललीलैकप्रयोजनाः

कन्दुकाद्यारम्भा दृश्यन्ते तथैव परस्यापि ब्रह्मण ईश्वरस्य वानपेक्ष्य किञ्चित्प्रयोजनान्तरं स्वभावादेव लीलारूप प्रवृत्तिर्भविष्यतीत्यादिभाष्यकाराणां व्याख्यानप्रयत्ना नितरां निष्फलाः । लोकदृष्टान्तेनेश्वरस्य ब्रह्मणो वा कार्यस्य संतुलनं मेधासमतुलां दूरमपनयति । न हि कश्चन मेधावी लौकिकोपि निष्प्रयोजनां क्रियां करोति किमुत सर्वज्ञं ब्रह्म सर्वज्ञो वा परमेश्वरस्तां विधास्यति । अथ च कथं विज्ञायते लौकिकानां कन्दुकक्रीडादिलीलाः प्रयोजनमनभिसन्धायैव प्रवर्तन्ते ? अवश्यं तेषां ता लीलाः सप्रयोजनाः । कन्दुकादिक्रीडया स्वास्थ्यसंवर्धनरक्तसंचारणव्यायामसम्पादनादीनि महाफलानि प्रेप्सन्ति क्रीडकाः । बालानां च स्पष्टतया मनोरञ्जनं भवत्यप्रत्यक्षतया तूपरिगणितानि सर्वाण्येव देहबलवर्धनफलानि भवन्ति । समयमाहात्म्यविदां तत्त्वविदां च क्षणमेकमपि नापसरति वैयर्थ्यमुखेन । अतो व्याख्येयमेतत्सूत्रमेतादृशा वर्त्मना—लोकवत्तु लीला-जगन्निर्माणप्रवृत्तौ ब्रह्मणः सर्वशक्तिमतः सर्वज्ञस्य च न श्रमो न वा प्रयोजनं किञ्चित् । कुतः ? लीला । अश्रमसाध्यैवेयं सृष्टिर्ब्रह्मणः । न हि घटसिसृक्षोः कुलालस्य मृदाहरणं मृत्संशोधनं तत्क्लेदनं चक्रारोपणं दण्डसञ्चालनमित्यादिकाः क्रिया इव ब्रह्मणः क्रिया प्रवर्तन्ते नाम । तदर्थं तु सृष्टिनिर्माणं लीला-अश्रमसाध्यं कर्मेति । जीवकृतकर्मापेक्षयैव जीवफलभोगाय ब्रह्मणो निखिलाः क्रियाः प्रवर्तन्ते ॥२।१।३३॥

कैवल्यम् ॥२।१।३४॥

यदि ब्रह्म लीलाकर्मप्रवृत्तिमत्तर्हि कथं न तत्र ते ते दोषाः प्रवर्तेरन् । के ते दोषाः ? पापिनां पापकर्मस्मृतिसमये पापा बुद्धिः पुण्यात्मनां च पुण्यकर्माकलनकाले कलुषा बुद्धिरिति । सर्वेषां जीवानां कृतकर्माण्यपेक्ष्यैव ब्रह्मणः फलदातृत्वमिति सर्वागमावगतिः । अस्मृत्वा च तत्तज्जीवानां तानि तानि कर्माणि सर्वशक्ति सदपि ब्रह्म कथं निर्मिनुयात् ? एवं च न तत्र कैवल्यं सिध्यति । ब्रह्मणः केवलत्वं च वेदे प्रसिद्धम् । तथा हि--"इन्द्रं वो विश्वतस्परि हवामहे जनेभ्यः । अस्माकमस्तु केवलः ॥ (ऋ० १।७।१०) "इह त्वष्टारमग्रियं विश्वरूपमुपह्वये । अस्माकमस्तु केवलः" (ऋ० १।१३।१०) "न रेवता पणिना सख्यमिन्द्रोऽसुन्वता सुतपाः संगृणीते । आस्य वेदः खिदति हन्ति नग्नं वि सुष्वये पक्तये केवलोभूत्" (ऋ० ४।२५।७) "प्रेन्द्रस्य वोचं प्रथमा कृतानि प्र नूतना मघवा या चकार । यदेददेवीरसहिष्ट माया अथाभवत्केवलः सोमो अस्य ॥" (ऋ० ७।९८।५) "त्वं तमिन्द्र पर्वतं महामुरुं वज्रेण वज्रिन् पर्वशश्चकर्तिथ । अवासृजो निवृताः सर्तवा अपः सत्रा विश्वं दधिषे केवलं सहः ॥" (ऋ० १।५७।६॥) इतिअत्र ब्रमः । ब्रह्मणः कवल्यं सिध्यत्येव । यो ह्यात्मलाभाय किञ्चित्कर्तुं प्रवर्तेतावश्यं तस्य कैवल्यं विहन्येत । नास्ति ब्रह्मणः कयाचिदपि क्रियया किञ्चिदिह प्राप्यम् । आप्त-

कामं हि तत् । स्वार्थराहित्यपुरस्सरं हि तस्य प्रवृत्तिः । सा च लोककल्याणायैव न स्वार्थाय । तथा हि--" तदु प्रयक्षतममस्य कर्म दस्मस्य चासतममस्ति दंसः । उपह्वरे यदुपरा अपिन्वन् मध्वर्णसो नद्यश्चतस्रः ॥" (ऋ० १।६२।६) "ददानमिन्न ददभन्त मन्माग्निर्वरूथं मम तस्य चाकन् । जुषन्त विश्वान्यस्य कर्मोपस्तुतिं भरमाणस्य कारोः ॥" (ऋ० १।१४८।२) "त्रिकद्रुकेषु महिषो यवाशिरं तुविशुष्मस्तृपत्सोममपिबद्विष्णुना सुतं यथावशत् । स ईं ममाद महि कर्म कर्तवे महामुरुं सैनं सश्चद्देवो देवं सत्यमिन्द्रं सत्य इन्द्रः ॥" (ऋ० २।२२।१) "ब्रह्मणस्पतेरभवद्यथावशं सत्यो मन्युर्महि कर्मा करिष्यतः । यो गा उदाजत्स दिवे वि चाभजन्महीव रीतिः शवसासरत्पृथक् ॥" (ऋ० २।२४।१४) । ब्रह्मासत् । असतः कथं सज्जायेतेति न शङ्कितव्यम् । ब्रह्मणोसत्त्वस्य वेदे कुत्राप्यप्रतिपादनात् । नन्वस्त्येवासतः प्रदिपादनं वेदे । तथा हि--" देवानां पूर्व्ये युगेऽसतः सदजायत । देवानां युगे प्रथमेऽसतः सदजायत ॥" इति (ऋ० १०।७२।२-३) । सत्यम् । नास्य मन्त्रस्य तेर्थावगतिः । नानेनाभावाद्भावोत्पत्तिः प्रतिपाद्यते । किं तर्हि ? असतोभवतोजायमानादजाताद्वा ब्रह्मणः सत् सूक्ष्मावस्थावस्थितं जगदजायतेत्येवास्यार्थः । अस्तिभवत्यादीनां समानार्थकत्वं सर्वशब्दशास्त्रवित्प्रसिद्धम् । असतोभवतोनुत्पद्यमानादित्यर्थः । न हि केनापि कर्मणा लिप्तं भवति ब्रह्म ।

तत उक्तं "कैवल्यम्" इति। तस्य कैवल्यमविनश्यत्कलेवरमितिस्पष्टार्थः। न च यस्माद्यज्जायते कस्मात्तदविकृतमवतिष्ठेतेति वाच्यम्। अपादानत्वात्। असतः सदजायतेत्यत्रासत इत्यत्रापादानपञ्चमी। अपादानशब्दस्तु तत्तत्कर्मानधिकरणत्वे सति तत्कर्मजन्यविभागाश्रये शक्त इति न ब्रह्मणो विकारप्रसङ्गः। "इयं विसृष्टिर्यत आ बभूव" (ऋ० १०।१२९।७) इत्यादिश्रुतावप्यपादानत्वस्य श्रवणान्न ब्रह्मणि दोषोत्थानम्। दोषं द्रावयन्ती हि श्रुतिः साफल्यमालिङ्गति। "तदिदास भुवनेषु ज्येष्ठम्॥ (ऋ० १०।१२०।१) इत्यादावपि भुवनानां भूतानां भविष्यतां च ब्रह्मणो ज्येष्ठत्वमुक्तम्। ज्येष्ठत्वं च तस्य सृष्टेः प्रागवस्थानरूपमेव। "हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत्" (ऋ० १०।१२१।१) इत्यत्रापि ब्रह्मणो जगत्पूर्वस्थायित्वमभिधीयते। हिमवतो गङ्गा प्रभवतीत्यादौ न भवति प्रतीतिर्हिमवति विकारस्य। ननु प्रभवन्त्यां हिमगिरेर्गङ्गायां सहस्रशो गिरिकणाणूनां दर्शनादपादानेपि विकारस्वीकारस्य कर्तव्यतया न तत्र पक्षः स्वकक्षां लक्ष्यीकरोतीति चेत् न। पथि प्रसृतानां रेणुकणानामेव प्रवाहेणायातानां गङ्गायां दर्शनान्न तत्रापादानविकारोत्थानप्रसङ्गः। अथवा तिष्ठतु नामापादानेपि विकारः। अस्मन्मते चिदचिद्विशिष्टस्यैव ब्रह्मणः सर्वत्र कारणत्वानुसन्धानाद्विशेष्ये ब्रह्मण्य-

सम्भवन्धर्मों विशेषणे लब्धप्रतिष्ठो भवति। एवं विकार-धर्मेण विकारतामचिदेव विचिनुते न कदाचिदिति ॥२।१।३४॥

वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथा
हि दर्शयति ॥२।१।३५॥

अस्यां सृष्टौ कश्चित्सुखी कश्चिच्च दुःखी कश्चित्सुदर्शनो दुर्दर्शनश्च कश्चन इति वैषम्यं नैर्घृण्यं च प्राप्नुतो ब्रह्मणि। न। ब्रह्मणि नास्ति वैषम्यं न वा नैर्घृण्यम्। कुतो न? सापेक्षत्वात्—येन जीवेन यादृक् कर्म कृतं पापं वा पुण्यं वा तदनुसारिफलप्रदानेन ब्रह्मणि न तौ दोषौ प्रसरतः। जीवकृतकर्मसापेक्षमेव फलप्रदानं निस्स्पृहस्य तटस्थस्य ब्रह्म-देवस्य न स्वातन्त्र्येण यथेच्छम्। तथा हि दर्शयति। कुत्र? वेदे। तथा हि—"यत्र ब्रह्मविदो यान्ति दीक्षया तपसा सह। वायुर्मा तत्र नयतु वायुः प्राणान्दधातु मे॥" (अथ० १९।४३।२॥) एतेन फलतीदं यः साधुकर्मकारी भवति साध्वीं स योनिमापद्यते। यश्चासाधुकर्मकारी भवति योनिमसाध्वीं स आपद्यते। एवं च जीवकर्मानुसृत्यैव ब्रह्मणः फलदातृत्वं न चान्यथा न च स्वातन्त्र्येण स्वेच्छयेति॥ २।१।३५॥

न कर्माविभागादिति चेन्नानादित्वा-
दुपपद्यते चाप्युपलभ्यते च ॥ २।२।३६॥

न। किन ? सृष्टेः पूर्वं कर्मकृतो जीवस्य कर्मासीदिति न। कर्मकर्तुरभावात्कर्मापि नेत्याह-अविभागात्। अविभाग-श्रवणात्। जीवब्रह्मणोर्विभागो जीवब्रह्मविभागस्तदभावो जीवब्रह्मविभागाभावः श्रूयते। तथाहि "न मृत्युरासीदमृतं न तर्हि न रात्र्या अह्न आसीत् प्रकेतः। आनीदवातं स्वधया तदेकं तस्माद्धान्यन्न परः किं चनास॥" (ऋ० १०।१२९।२॥) इति चेन्न। अनादित्वात्। जीवा अनादयस्तेषां कर्माण्यप्यनादीन्येवौचित्यात्। ननु कुतो जीवाना-मनादित्वं श्रुत्या निषिद्धत्वात् ? न जावानामनादित्वं श्रुत्या प्रतिषिध्यते। ननु निषिद्धमेव "तस्माद्धान्यन्न परः किंच-नास" इति। न निषिद्धम्। जीवब्रह्मणोः शरीरशरीरिभाव इति तु शतश उक्तम्। सत्यमुक्तं किं तेन ? तेनेदं फलति ब्रह्मण इव जीवस्याप्यनादित्वम्। नेदं सिध्यति। लोके देहजीवयोः शरीरशरीरिभावः सर्वसिद्धः। देहिनो नित्यत्वेपि न देहनित्यत्वं त्वयापि स्वीक्रियते। नेदं युक्तम्। कुतो न युक्तम् ? "कामस्तदग्रे समवर्तताधि मनसो रेतः प्रथमं यदा-सीत्। सतो बन्धुमसति निरविन्दन् हृदि प्रतीष्या कवयो मनीषा॥" (ऋ० १०।१२९।४) अस्मिन्मन्त्रे कामपदेन जीवस्यैव ग्रहणम्। कामयत इति कामः। जीवः सुखादि कामयत एव। "यत्कामा जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम्" (ऋ० १०।१२१।१०) "अग्ने नय सुपथा राये अस्मान्" (ऋ० १।१८९।१) इत्यभ्यर्थनमपि

काम एव । ननु नायं कामः प्रार्थना खल्वेषा । सत्यं प्रार्थना । कामादतिरेकेण न प्रार्थनासंभवः । "रेतोधा आसन् महिमान आसन् स्वधा अवस्तात्प्रयतिः परस्तात् ॥" (ऋ० १२०।१२९।५॥) अत्र रेतोधाशब्देन जीवा एवोच्यन्ते । एवं च ब्रह्मशरीरतया जीवानामविभाग उपपद्यते नित्यत्वं चेति । ननूक्तं जीवानां शरीरित्वेनित्यत्वमिति । उक्तं तु, परमविचारितमुक्तम् । कर्मफललब्धमेवं शरीरमनित्यं भवति । जीवरूपशरीरप्राप्तिर्न ब्रह्मकर्मफलरूपम् । अकर्म हि ब्रह्म नित्यमवाप्तकाममपि । ब्रह्मधार्यत्वेन हि जीवानां ब्रह्मशरीरत्वम् । "स धाता स विधर्ता ॥ (अथ० १३।४।३॥) इत्यनेन जीवानां ब्रह्मधार्यत्वं सिद्धमेव । "एते अस्मिन्देवा एकवृतो भवन्ति" (अथ० १३।४।१३॥) इत्यनेन सर्वेषां जडाजडानां ब्रह्मण आधारत्वमुक्तं भवति । एवं च ब्रह्मशरीरतया जीवानादित्वं नाभ्युपेयते चेदकृताभ्यागमकृतप्रणाशप्रसङ्ग उपतिष्ठते । लोके दृश्यते कश्चन सुखी दुःखी च कश्चन । कथमेतत्स्याद्यदि जीवानादित्वं न स्वीक्रियेत । अनादित्वात्तेषामानन्त्यं तु सिद्धमेव । अन्येन कृतस्यान्येनोपभोगोपि प्रसज्यते । न च जीवापरपर्यायस्यात्मनो नानादित्वं "य आत्मदा बलदा" (ऋ० १०।१२१।२) इतिमन्त्रसामर्थ्यादितिवाच्यम् । अत्रात्मशब्दस्य जीवात्मातिरिक्तार्थे श्रवणात् । "यस्य विश्व उपासते" इतिमन्त्रशेषे विश्वशब्देनोपासकानामात्मनामेव ग्रहणाच्च । ननु

नेदं समीचीनमुक्तम् । आत्मानित्यत्वेपि ब्रह्मोपासकत्वं तेषामक्षतम् । सत्यमक्षतम् । "वि यस्तस्तम्भ षडिमा रजांस्यजस्य रूपे किमपि स्विदेकम् ॥" (अथ०९।९।७॥) "सनादेव न छिद्यते "सनाभिः" (अथ० ९।८।११॥) "द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते । तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभि चाकशीति ॥" (अथ० ९।८।२० ॥) "जीवो मृतस्य चरति स्वधाभिरमर्त्यो मर्त्येना सयोनिः ।" (अथ० ९।१०।८ ॥ इत्यादिभिर्मन्त्रैस्तु विस्पष्टं जीवनित्यत्वं सिध्यति । एवम् "ऋतस्य देवा अनु व्रता गुर्भुवत्परिशिष्टिर्द्यौर्न भूम । वर्धन्तीमापः पन्वा सुशिश्विमृतस्य योना गर्भे सुजातम् ॥ (ऋ० १।६५।२॥)– देवा जीवा ऋतस्य परमात्मनो व्रता व्रतानि धर्मान् अनुगुरन्वगच्छन् । यथा परमात्मा नित्यत्वादिधर्मा तथा जीवात्मानोपीत्यर्थः । अस्मिन्मन्त्रे जीवनित्यत्वं द्योतितम् । किं च "अस्मे वत्सं परि षन्तं न विन्दन्निच्छन्तो विश्वे अमृता अमूराः । श्रमयुवः पदव्यो धियंधास्तस्थुः पदे परमे चार्वग्ने ॥ (ऋ० १।७२।२॥) परि षन्तं वत्सं परमात्मानमिच्छन्तो विश्वे सर्वे अमृता अमरणधर्माणः, अमूरा अविनाश्या जीवा इच्छन्तोपि न विन्दन् न लभन्ते । ये च श्रमयुवः श्रमयुक्ताः पदव्यः स्थानज्ञा धियंधाः सत्कर्मकर्तारः सन्ति ते अग्नेः परमे पदे चारु तस्थुस्तिष्ठन्ति च । अत्र अमृता अमूरा इति पदद्वयं जीवात्मनो नित्य-

स्वरूपतामेव ख्यापयति। किं च, "स संस्तिरो विष्टिरः सं गृभायति जानन्नेव जानतीर्नित्य आ शये" (ऋ० १। १४०।७॥) अत्र संस्तिरविष्टिरनित्येत्यादयः शब्दा जीवात्मनो नित्यत्वमेवाहुः। "अन्धा अपश्या न दभन्नभिख्या नित्यास ईं प्रेतारो अरक्षन्॥" (ऋ० १।१४८। ५॥) इत्यनेन मन्त्रेण नित्यासइत्युक्त्या जीवानां नित्यत्वमेवोच्यते। "यो राजभ्य ऋतनिभ्यो ददाश यं वर्धयन्ति पुष्टयश्च नित्याः॥" (ऋ० २।२७।१२॥ इत्यत्रापि नित्या इतिपदेन जीवा एवोच्यन्ते। उपलभ्यते चेति व्याख्यातम्। सिध्यति च ततो ब्रह्मण एव जगत्कारणत्वम्॥ २।१।३६॥

सर्वधर्मोपपत्तेश्च ॥२।१।३७॥

ब्रह्मैव जगत्कारणमितिस्वीकारे सर्वधर्माणां जडे वस्तुनि सर्वथानुपपन्नानां धर्माणामुपपत्तेः सिद्धेश्च ब्रह्मैव जगत्कारणमिति सिद्धम्। तच्च ब्रह्म चिदचिद्विशिष्टमेवेति न विस्मर्तव्यम्॥ २।१।३७॥

(इति प्रयोजनवत्त्वाधिकरणम्—१०)

इति सर्वतन्त्रस्वतन्त्रैः काशीपण्डितसभया पण्डितराजेत्युपाधिविभूषितैः कवितार्किकैः सर्ववेदव्याख्यातृभिः स्वामिश्रीभगवदाचार्यमहाराजैः प्रणीते वेदान्तदर्शनापरपर्यायब्रह्मदर्शनवैदिकभाष्ये द्वितीयाध्याये प्रथमः पादः

अथ द्वितीयेऽध्याये द्वितीयः पादः

(रचनानुपपत्त्यधिकरणम्—१)

रचनानुपपत्तेश्च नानुमानम् ॥२।२।१॥

अनीश्वरेयं सृष्टिरिति वेदविरुद्धः पन्थाः। निराकृतश्च गतेऽध्यायेयं पक्षः। पौनःपुन्येन प्रतिहन्यमानो विरोधिपक्षो नोत्थानमाप्नुयादिति किञ्चिद्वैशिष्ट्यमाश्रित्य पुनस्तन्निरसने भगवतो व्यासस्य श्रमः। तत्रेदमाद्यं सूत्रम्। अनुमानम्—अनुमीयत इत्यनुमानम्। अनुपूर्वकमाधातोरत्र प्रत्यक्षातिरिक्तसमस्तप्रमाणोदयनिरासोऽर्थः। चकारः पूर्वोक्तहेतुसंग्रहार्थः। रचनानुपपत्तेश्च—रचनाया ईदृग्विश्वरचनाया यं कमपि कर्तारमन्तरेणानुपपत्तेरसिद्धेर्नानुमानं प्रमाणमुपस्थापयितव्यम्। अनुमानशब्दार्थस्तु साङ्केतिकः। प्रत्यक्षं तु न किमपि दृश्यतेऽद्य। कदापि नादृश्यत कदापि च न द्रक्ष्यते। अतोऽनुमानमेवाश्रयो वेदविज्ञानावमाने विचितचेतसाम्। यदि कश्चन धीमहीधरः कर्तास्याः सृष्टेर्न भवेदीदृशो विलक्षणसृष्टेरनुपपत्तिरसिद्धिरेव स्यात्। अतो नानुमानं सृष्टेः प्रवर्तकमिति। अवश्यं केनापि चेतनेन कर्त्रास्य जगतो भाव्यम्। आकस्मिकमिदं जगत् सर्वत्राव्यवस्थादर्शनात्। भुवः कम्पोतिवृष्टिरवृष्टिस्तारावपातः सिंहव्याघ्रकालादिमहाभयङ्करप्राणिसृष्टिरित्यादयोऽनिष्टप्रवाहाः सूचयन्ति नास्ति

कोपि जगतोस्य विधाता धाता संहर्ता चेति। नित्यमिदं जगत्। आकस्मिकमिदं जगत्। ब्रह्मणो विवर्त एवेदं जगत्। इत्येवंबहुविधविरुद्धपक्षरक्षादीक्षिताः पक्षाश्चिरेणोदीयुर्जीवन्ति चाद्यावधि कुशलिनः। रचनानुपपत्तेरितिहेतुहेतिना सर्वे पक्षाः समच्छियन्त। न च "किं स्विद्वनं क उ स वृक्ष आस यतो द्यावापृथिवी निष्टतक्षुः॥" (ऋ० १०।३१।७॥ इत्यादिना वचसावगम्यतेस्य जगतः को नामोद्भावयितेति वेदा अपि नावगन्तुं शक्नुवन्नीत्याकस्मिकमेवेदं जगदिति वाच्यम्। ऋतं च सत्यं चाभीद्धात्तपसोऽध्यजायत। ततो रात्र्यजायत ततः समुद्रो अर्णवः। समुद्रादर्णवादधि संवत्सरो अजायत॥" (ऋ० १०।१९०।१२) इत्यादिना जगदुन्नायकस्य निर्णीतत्वात्। न च "नासदासीन्नो सदासीत्तदानीं नासीद्रजो नो व्योमा परो यत्।" (ऋ० १०।१२९।१॥) को अद्धा वेद क इह प्रवोचत् कुत आ जाता कुत इयं विसृष्टिः।" (ऋ० १०।१२९।६॥) इत्यादिना वचनराशिना सृष्टेः पूर्वं किमपि नासीदित्युपदिशता भगवता वेदेनाकस्मिकीयं सृष्टिरित्यभिहितमिति वाच्यम्। "इयं विसृष्टिर्यत आ बभूव यदि वा दधे यदि वा न। यो अस्याध्यक्षः परमे व्योमन् सो अङ्ग वेद यदि वा न वेद॥" (ऋ० १०।१२९।७॥) "इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्। समूढमस्य पांसुरे॥" (ऋ० १।२२।१७॥) इत्यादिभिर्मन्त्रैर्जगतः कर्ता निरदेशि वेदेन।

"विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे । इन्द्रस्य युज्यः सखा ॥" (ऋ० १।२२।१९॥) एतेनापि जगतः कर्ता स्पष्ट एव निर्दिष्टः । अतो जगद्रचनानुपपत्तिर्नोपपत्तिं सहते । ततश्चानुमानस्य नास्त्यवकाशः ॥२।२।२॥

पयोम्बुवच्चेत्तत्रापि ॥२।२।२॥

ननूक्तं रथादयश्चेतनाधिष्ठिता एव गतिमागतिं च कुर्वन्तीति प्रधानस्यापि कश्चित्प्रेरयितापेक्ष्यत एवेति । उक्तं तु, परं न तत्सत्यम् । पयोम्बुवत् पय इव, पय इव च प्रवृत्तिरुपपद्यत एव । पयो हि दधिरूपेण परिणमते तत्र न कश्चिच्चेतनः परिणमयितापेक्ष्यते । जलमपि क्षाराक्षारमधुरादिरूपेण स्वतो विपरिणमते न तत्रापि कश्चन विपरिणमयिता । एवं प्रकृतिकर्तृत्वेपि भावनीयम् । इति चेत्तत्रापि । क्षीरं दधिरूपेण परिणमयितुमवश्यमेव कश्चन कर्तापेक्ष्यते । न हि कर्तारमन्तरेण तत्र किञ्चिदपि भवितुं शक्नोति । न हि क्षीरं स्वयं दधिरूपतामश्नुते । तत्तामधिगमयितुं क्षीरमातञ्चनं दध्यपक्ष्यत एव । अपेक्षितमपि दधि न स्वयं पयसि पतति । पातयिता तत्र तस्य कश्चन चेतनोपेक्ष्यते । एवं जलस्यापि कथा । न हि जलं स्वयं क्षारं भवति । क्षारयुक्तपृथिवीसंयोगो हि तत्र हेतुतामावहति । संयोजकोपि तत्रापेक्ष्यत एव । क्षारं जलं मधुरयितुं पुरुषप्रयत्नोपेक्ष्यते । न हि पुरुषप्रयत्नमन्तरेण जलं न

केनाप्यद्यावधि क्षारमक्षारं दृष्टम् । कालोपि परिस्थितिरपि च तत्र हेतुतां धत्ते । अतोस्त्येवात्र कश्चिदधिष्ठाता सर्वेषां वस्तूनाम् ॥२।२।२॥

व्यतिरेकानवस्थितेश्चानपेक्षत्वात् ॥२।२।३॥

अनपेक्षत्वात्कस्यचिच्चेतनस्य कर्तुरपेक्षाविरहादेव यदि जगत्सर्जनस्वीकारस्तदा व्यतिरेकानवस्थितेर्व्यतिरेकेण सर्गव्यतिरेकेण प्रतिसर्गावस्थयानवस्थितिप्रसङ्गः स्यात् । ततो न स्वातन्त्र्येण प्रधाने कारणत्वानुसन्धानम् । ननु भवतु नाम चेतनाधिष्ठितत्वं प्रधानस्य, तथापि दोषस्तु तथैव । कथम् ? परस्य ब्रह्मणोकायत्वेन निष्क्रियत्वात् । क्रियाकारित्वं कायित्वेन व्याप्तम् । यत्र न कायस्तत्र न क्रियेति । असिद्धमेतत् दृष्टान्ताभावात् । कायाभावेपि वायौ क्रिया दृश्यत एव । नैतत्तथ्यम् । वायोरपि शरीरमस्त्येव । तच्छरीरसंसर्गेणैव शरीरिणां शीतलो वायुरुष्णो वायुस्तीव्रो वायुरित्याद्यनुभवः । सूक्ष्मातिसूक्ष्मं हि तच्छरीरम् । यदि तत्रात्यन्तिकः शरीराभावः स्यान्न स्यादाकाशवत्तस्य कदापि स्पर्शः । ननु स्पृश्यत्वाभावेन मा भूदाकाशस्य स्पर्शश्चाक्षुषं प्रत्यक्षं तु भवत्येव तस्य । अत एव नीलं नभ इति सर्वेषां सार्वदिकी प्रतीतिः संघटते । नेदं तथ्यम् । चाक्षुषमपि प्रत्यक्षं नभसो न भवति । नीलिमावगतिस्तु भ्रान्त्यैव नीलं नभश्चलतीतिवत् । न ह्याकाशे नीलिमा, तत्प्रतीतिस्तु चक्षुः-

शक्तेरवसादनादेव भवति। यावच्चक्षुः प्रसरति तावत्पदार्थप्रत्यक्षता। यत्र प्रतिहन्यते नायनायनशक्तिस्तत्रैव नीलिमप्रतीतिः। न च चक्षुःप्रतिघाते किमपि न प्रतीयेत कथं तत्र नीलिमप्रतीतिः? सत्यं चक्षुःप्रतिघाते न किमपि प्रतीयते। यत्किञ्चिदप्रत्ययनमेव नीलिमा। निमीलिते चक्षुषि नैव किञ्चित्प्रतीयते बाह्यम्, श्यामता तु प्रतीयत एव। सा चाभावसूचिका। ननु न ब्रह्माशरीरि तदेजनश्रवणात्। "तदेजती" ति। (शु० य० ४०।५)। ननु न ब्रह्म शरीरि। तदनेजनश्रवणात्। "तन्नैजती" ति। (शु०य० ४०।५) एवं च वचनप्रतिवचनसत्त्वे न ब्रह्मण्येजनानेजनयोः प्रसङ्गः। न तथा प्रसङ्गः। विरुद्धधर्मयोर्यौगपद्येन समानधर्म्यवस्थानं सर्वथा बाधितम्। न हि जले युगपच्छैत्यमौष्ण्यं च तिष्ठेताम्। बाढम्। ब्रह्मण्यप्येजनानेजनयोः क्रमेणैवावस्थानं स्यात्। क्वचिदेजनम्, क्वचिदनेजनमिति। नैतद्युक्तम्, यद्येजनधर्म ब्रह्म न कदापि तिष्ठेत्तस्मिन्ननेजनम्। यदि तदनेजनधर्म न कदापि तत्र तिष्ठेदेजनम्। एजनानेजनयोः सहानवस्थानमेव स्वभावसिद्धम्। ननु लोके क्रमेण विरुद्धधर्मयोरवस्थानं दृश्यते वह्नावौष्ण्यं शैत्यं चापि। वायावपि तथैव। एवं ब्रह्मण्यपि विरुद्धधर्माणां क्रमेणावस्थानं न विरुध्यत एव। लौकिकानां पदार्थानां भौतिकत्वात्स्यादेव तत्र परिवृत्तिः। स्याच्च कस्यचिद्धर्मस्यावस्थानं कस्यचिच्चानवस्थानमिति। परिवृत्तेः स्वभाव एवैषः। ब्रह्मणो-

भौतिकत्वात्परिवृतेरभावात्सर्वेषां तद्धर्माणां नैयत्यमेव, सार्वदिकमेव न कादाचित्कत्वम् । ननु तर्हि का गतिस्तदेजति तन्नैजतीतिश्रुतेः ? समीचीना गतिः । का सा । तदेजतीति शरीरशरीरिणोरभेदादेवदत्ते चलति ब्रह्म चलतीति प्रवादः । तन्नैजतीति ब्रह्मस्वभावनिर्देशः । न ह्यनेजनधर्मणि ब्रह्मणि कदापि कचिच्चैजनधर्मसम्पर्कः । किं च सत्त्वासत्त्वेन हि सर्वं व्याप्तम् । यदि ब्रह्म न सन्न चाप्यसत्तर्हि सन्देहास्पदं भवत्यस्तीति वा नास्तीति वा । सन्देहास्पदं भवति न हि नास्तीतिनिर्णयास्पदं भवति । भवतु नामानिर्णयास्पदं, निष्प्रयोजनं तु भवति । जलमजलमिति सन्देहे पिपासातुरस्यापि तत्र जलपाने प्रवृत्तिर्न भवति । एवं ब्रह्म सद्वासद्वेति सन्देहे न तत्र कस्यापि प्रवृत्तिः स्यात्तदुपासनादिषु कर्मसु । अत्रोच्यते । ब्रह्म शरीर्यशरीरि वा स्यान्नात्र किञ्चित्कस्यचिच्छिन्नं भवति । शरीरित्वे भौतिकशरीराभावान्न तन्नाशप्रसङ्गः । नाशो भौतिकत्वेन व्याप्तः । अशरीरत्वे च तस्मिन्न कस्यापि व्याकोपप्रसङ्गः प्रत्युत "अकायमव्रणम्" (यजु० ४०।८।) इत्यादेरानुकूल्यमेवेति । तस्य शरीरित्वे चक्षुरादीन्द्रियप्रत्यक्षप्रसङ्गोपि न । इन्द्रियाणां भौतिकत्वात्तच्छरीरस्य चाभौतिकत्वात् । न हि भौतिकं साधनमभौतिकं साधयेत् । ननु मनसो भौतिकत्वेपि तेनाभौतिकस्य ब्रह्मणः प्रत्यक्षं भवत्येवेति । न । मनसो ज्ञानसाधनत्वेन तेन ब्रह्मणो ज्ञानमेव स्यान्न प्रत्यक्षम् । न च ब्रह्मज्ञानमेव ब्रह्मप्रत्यक्ष-

तेति वाच्यम् । ब्रह्मज्ञानमित्यस्य ब्रह्मास्तित्वज्ञानरूपार्थस्य ब्रह्मप्रत्यक्षमित्यस्य च साक्षात्तद्दर्शनरूपार्थस्य स्वीकारात् । नन्वकायस्य तस्य कथं साक्षाद्दर्शनमिति चेत्, "त्वमग्ने सुभृत उत्तमं वयस्तव स्पार्हे वर्ण आ संदृशि श्रियः । त्वं वाजः प्रतरणो बृहन्नसि त्वं रयिर्बहुलो विश्वतस्पृथुः ॥" (ऋ० २।१।१२॥) इतिरीत्या वेदे तद्दर्शनस्य श्रवणात् । न च निर्निमित्तेयं सृष्टिः । जीवानां सुकृतदुष्कृतफलानुसारेणैव फलदाननिमित्तिकैषा सृष्टिः । परमदयालु ब्रह्म जीवान् कर्मवशतः पौनःपुन्येन संसरतो दुःखितांश्चावलोक्य तत्कर्म फलं ग्राहयित्वा मुक्तिधामनिनीषयैव सृष्टिप्रलयप्रसङ्गं प्रसञ्जयति । परदुःखदुःखिता हि दया । ब्रह्म स्वभक्तानां दुःखनिकायं दृष्ट्वा स्वयं दुःखमनुभवति तत एव तान्कर्मफलमनुभाव्य भक्तिमार्गमानीय तेन हेतुना स्वलोकं दुःखात्यन्ताभाववन्तं नीत्वा शाश्वतिकं सुखं प्रापयतीति । न च दयालु ब्रह्म कर्मफलमभोजायित्वापि स्वलोकं नेतुं समर्थमितिवाच्यम् । तत्स्वभावविरुद्धत्वात् । क्षमा न तस्य स्वभावः । दण्डेन पापकृज्जीवान्तरशोधनं हि ब्रह्मस्वभावः । अत एव अग्ने नय सुपथेत्यादि प्रार्थनं संगच्छते संघटत इति च ॥ २।२।३॥

अन्यत्राभावाच्च न तृणादिवत् ॥२।२।४॥

ननु सृष्टिनिर्माणे नास्ति ब्रह्मणः प्रयोजनम् । स्वयमेव यत्किञ्चित्साधनसंनिधानेन प्रकृतिः=प्रधानं सृष्टित्वमुप-

गाहते। नैतत्संगच्छते। प्राज्ञाधिष्ठितस्यैव सर्वत्र परिणामदर्शनात्। इदमेवाह—अन्यत्राभावाच्चेति। चेतनानधिष्ठितस्यान्यत्राभावात्परिणामाभावाच्च न समीहासिद्धिः। तत्र दृष्टान्तस्तृणादिवदिति। तृणादिकमपि गवादिभिरुपभुक्तमेव क्षीराकारेण परिणमते नाभुक्तम्। अतः कश्चिज्ज्ञ एव गवाद्युपभुक्तं तृणादि क्षीरत्वेन परिणमयति। तद्भुक्तमपि बन्ध्याया अप्रसवाया वा गोर्न क्षीरत्वेन परिणमते। प्रसवानन्तरमेव ब्रह्मप्रबन्धेन दुग्धधाराधराः पयोधरा भवन्तीति ॥२।२।४॥

पुरुषाश्मवदिति चेत्तथापि ॥२।२।५॥

पुनराशङ्क्य समाधत्ते—प्रधानमचेतनम्। न केवलं तत्किञ्चिदारब्धुं शक्नोति। चेतनसन्निधानेनैव भवति तत्प्रवृत्तिमत्। यथा पादेन खञ्जो दर्शनकुशलमाश्रित्य देशान्तरं गच्छति। यथा वा नयनविहीनः खञ्जमाश्रित्य तत्सङ्केतेन पन्थानं गच्छत्यवशेषयति च। तथैवाकर्तृ चेतनाशून्यं च प्रधानं परस्परं संयुज्य सर्जनं प्रवर्तयतः। यथा वायस्कान्तसन्निधानमाधायायः प्रवर्तते तथैव प्रधानचैतन्ययोर्विलक्षणसंनिधानेन सृष्टिर्गृहीताकारा भवतीति। तन्निरस्यति चेत्तथापीति। पङ्ग्वन्धयोश्चेतनत्वात् प्रवृत्तिरुपपद्यते। लोहायस्कान्तयोस्तु नियता प्रवृत्तिः। आकर्षणमात्रमेव भवति तत्र। स तु वस्तुगतो धर्मः। सूर्याकर्षणेन पृथिवी पृथि-

न्याश्चाकर्षणेन सूर्यो यथा पतनान्निवर्तेते न चान्यां काञ्चित्प्रवृत्तिं कुर्वाते तथा लोहायस्कान्तमणी चापि। न च पृथिवी यथा स्वधारणं कुरुते तथाहोरात्रसम्पादनायोभयथा गतिमपि कुरुते, एवमहस्करोपि स्वधारणमपि कुरुते प्रकाशादिमपि तनुते इति तयोर्दृष्टान्तः कार्यक्षमो भवतीति वाच्यम्। कार्यक्षमो भवत्येव सः। गतिरपि वस्तुधर्मः। न तत्र चेतनश्चेतयते ते इति। नैसर्गिकी हि तयोर्गतिः। प्रथमदृष्टान्तस्तव पक्षमाक्षिपत्येव न साधयति। द्वितीयस्तु केवलं द्वयोः संसर्गं साधयन्त्सृष्टिनिर्माणं न साधयति। किं च किंकृतं तयोः सन्निधानम्? यदि पुरुषकृतं न पुरुषो निष्क्रियः सिध्येत्। प्रधानकृतं चेत्स्वरूपासिद्धः। तस्याचेतनत्वात्सन्धानानुसन्धानमेव न सिध्येत्। यदि सार्वदिकं सन्निधानं सर्वदैव सृष्टिप्रसङ्गः स्याचथा च तवाप्यभिमतस्य प्रलयस्य प्रसङ्ग एव न स्यात्। मा भूत्प्रलय इत्युच्यते तदवैदिकत्वाद्धेयमेवेदं मतम् ॥२।२।५॥

अङ्गित्वानुपपत्तेश्च ॥२।२।६॥

अङ्गी शरीरी। स च परमात्मा। तथा हि वेदे "तव शरीरं पतयिष्ण्वर्वंस्तव चित्तं वात इव ध्रजीयान्। तव शृङ्गाणि विष्ठिता पुरुत्रारण्येषु जर्भुराणा चरन्ति ॥" (ऋ० १।१६३।११॥) हे अर्वन्परमात्मन्। ऋच्छति इयर्ति अर्यते वेति अर्वा। सर्वप्राप्य परमेश्वर। तव परमात्मनः। शरीरं

जीवः प्रकृतिश्च । पतयिष्णु गमनशीलम् । जीवो गच्छति निस्सृत्यैकस्माच्छरीरादन्यच्छरीरम् । तव चित्तं ज्ञानम् । वात इव ध्रजीयान् शीघ्रगमनशीलं सर्वव्यापकमिति भावः । तव शृङ्गाणि दण्डदानसामर्थ्यानि । विष्ठितानि वैविध्येन स्थितानि । अरण्येषु विविधशरीरेषु । अर्यते गम्यते प्राप्यते जीवैः स्वकर्मानुसारेणेत्यरण्यं शरीरम् । पुरुत्रा बहुषु योनिषु । जर्भुराणा मनोहराणि । हृञ् हरणे । चरन्ति व्याप्नुवन्ति । एतेन जीवा ब्रह्मणोऽङ्गमित्युक्तम् । "यास्ते शिवास्तन्वो जातवेदस्ताभिर्वहैनं सुकृतामु लोकम् ।" (ऋ० १०।१६।४।। हे जातवेदः परमेश्वर यास्ते शिवाः कल्याणकारीणि । तन्वः शरीराणि जीवाः । ताभिस्तैः शरीरैः शरीरभूतैर्जीवैः सह । एनं शरणापन्नं जीवम् । सुकृतां सत्कर्मणां लोकं सत्कर्मकर्तृभिः प्राप्यं लोकमित्यर्थः । वह प्रापयेति । यदि नास्ति कश्चन कर्ता चेतनोस्य जगतो वेदेषु प्रतिपाद्यमानस्याङ्गिनोङ्गित्वानुपपत्तिः स्यात् । अतोवश्यं चेतनः कर्ता परमात्मा स्वीकर्तव्यः । स एव ब्रह्म ।।२।२।६।।

अन्यथानुमितौ च ज्ञशक्तिवियोगात् ॥ २।२।७॥

ब्रह्मान्तरेणापि जगत्सर्जनं भवतीति ते मतं निराकृतम् । अन्यथा अनुमितौ—यद्यन्येन केनापि प्रकारेणानुमितिरनुमानं क्रियते तदा ज्ञशक्तिवियोगाज्ज्ञातृत्वशक्तिविरहात्त एव दोषा उपस्थिताः स्युः । अयमाशयः । तत्रोपस्थापिता जगत्सर्जन-

प्रकारा निराकृताः। यद्यन्या अपि काश्चन युक्तयस्त्वयोपस्थापिता भवेयुस्तदा ता अपि ज्ञशक्तिवियोगादेव निराकर्तव्याः। जानातीति ज्ञश्चेतनः। चेतनस्य याः शक्तयस्तासां वियोगस्तस्मात्। न हि प्रधानेचेतने ज्ञशक्तिसंयोगस्त्वयापि स्वीक्रियते। न च नास्ति ज्ञशक्तिवियोगस्तत्संयोग एव प्रधाने कार्यजननक्षमतोदयादितिवाच्यम्। चेतनसन्निधानेपि नोदयतेचेतने कार्यक्षमत्वम्। लोहायस्कान्तदृष्टान्तस्तु पूर्वं दूषित एवेत्यतो नानुमानं कार्यसाधकमिति ॥२।२।७॥

अभ्युपगमेप्यर्थाभावात् ॥२।२।८॥

प्रधानेन सह चेतनस्य संसर्गाभ्युपगमेप्यर्थाभावान्न हि किञ्चित्प्रयोजनं सिध्यति। अयमर्थः पूर्वं विस्तरेणोक्तः। न हि चेतनसंसर्गमात्रेण प्रधाने चैतन्यं कार्यकर्तृत्वं च समभ्येति ॥२।२।८॥

विप्रतिषेधाच्चासमञ्जसम् ॥२।२।९॥

विप्रतिषेधो विरोधः। विरोधादपीश्वरानधिष्ठितजीवप्रकृतिसंयोगे सृष्टिविकासोसमञ्जसमसिद्ध इति यावत्। विप्रतिषेधस्त्वेतादृशः—चेतनं विकार्यविकारि वा। यदि विकारि तवैव सिद्धान्तहानिः। त्वन्मतेपि तस्य निर्विकारत्वात्। अविकारि चेत्, सन्निधानमात्रेण जडे विकारं जनयितुमशक्तमेव स्यात्। विकार्येव विकारं जनयति। ननु तर्हीश्वरोपि विकारितां भजेत प्रकृत्यादिषु विकार-

जननात्। न। न हि स विकारं जनयति। सतां सूक्ष्मपदार्थानां स्थूलतां सङ्कल्पमात्रेणोत्पादयति। ननु दृश्यते सन्निधानमात्रेणायस्कान्तमणेर्जडे लोहे विकारोत्पादकत्वमिति। नूनं दृश्यते। तत्र जडमेव जडं विकरोति नाजडं जडं जडं वाजडमिति। किं च विकारो नामान्यथाभवनं स्वरूपपरिवर्तनं वा। उक्तं च विश्वनाथविदुषा न्यायदर्शनवृत्तौ स्वरूपस्य विनाशेविनाशे वा द्रव्यान्तरारम्भकत्वम्। यथा दुग्धादेर्दध्यारम्भकत्वम्। सुवर्णादेरप्यवयवसंयोगनाशेवयविनो नाशे सत्येव कुण्डलारम्भः। कपालादेश्च स्वरूपाविनाशेन घटाद्यारम्भकत्वम्। प्रकृतेरन्यरूपः परिणाम एव विकारशब्दार्थः। लोहायस्कान्तसंयोगेपि लोहे न कश्चिद्विकारो दृश्यते। नन्वन्यस्मिन्नन्यसंयोगोपि विकार एवेति। न। संयोगो न विकारः। हस्तयोः संयोगो भवत्येतावता हस्तयोर्विकारो जात इति केन मतिमताभिमतं स्यात्? किं चायोयस्कान्तयोः संयोगे केवलमाकर्षणं भवति न किञ्चिदन्यत्। आकर्षणं तज्जन्यसंयोगश्चोभौ यदि विकारत्वेनाभिमतौ स्यातां तदा भवतु नाम विकारः। नाम्ना विकारो न स्वरूपेण। अतश्चेतनसन्निधानेन प्रकृतौ विकार इति न रुचिकरम्। ननु कथं न ते रुचिकरतां तनोतीयं वार्ता? न दृश्यते धूमयाने मोटरे वा वायुयाने वा चेतनसन्निधानेनैव गतिर्भवतीति? बाढं दृश्यते। न तत्र केवलं सन्निधानम्, चेतनकृतक्रियादि कारणम्। त्वन्मते चेतनस्य निष्क्रिय-

स्त्वात्क्रियाविरहान्नैव भवेज्जडे प्रवृत्तिरिति। तस्मादसमञ्जसम्। वैदिकमते तु–“अया विष्ठा जनयन् कर्वराणि स हि घृणिरुरुर्वराय गातुः। स प्रत्युदैद्धरुणं मध्वो अग्रं स्वया तन्वा तन्वमैरयत॥” (अथ० ७।१।४॥) “यच्च प्राणिति प्राणेन यच्च पश्यति चक्षुषा। उच्छिष्टाज्जज्ञिरे सर्वे दिवि देवा दिवि श्रितः॥” (अथ० ११।७।२३॥) “ऋचः सामानि छन्दांसि पुराणं यजुषा सह। उच्छिष्टाज्जज्ञिरे सर्वे दिवि देवा दिविश्रितः॥” (अथ० ११।७।२४॥) “प्राणापानौ चक्षुः श्रोत्रमक्षितिश्च क्षितिश्च या। उच्छिष्टात्०॥” (अथ० ११।७।२५॥ “आनन्दा मोदाः प्रमुदोभीमोदमुदमुदश्च ये। उच्छिष्टात् .... ॥” (अथ० ११।७।२६॥) “देवा पितरो मनुष्या गन्धर्वाप्सरश्च ये। उच्छिष्टात्....॥” (अथ० ११।७।२७॥) ऊर्ध्वो रोहितो अधि नाके अस्थाद्विश्वा रूपाणि जनयन्युवा कविः। तिग्मेनाग्निर्ज्योतिषा वि भाति तृतीये चक्रे रजसि प्रियाणि॥” (अथ० १३।१।११॥) “यो विश्वचर्षणिरुत विश्वतोमुखो यो विश्वतस्पाणिरुत विश्वतस्पृथः। सं बाहुभ्यां भरति संपतत्रैर्द्यावापृथिवी जनयन्देव एकः॥” (अथ० १३।२।२६॥) इत्यादिवेदशब्दैर्ब्रह्मणो जगत्कर्तृत्वं सिद्धं नापनुद्यते॥ २।२।९॥

(इति रचनानुपपत्त्यधिकरणम्–१)

–०–

अथ महद्दीर्घाधिकरणम्—२

महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम् ॥ २।२।१०॥

एतावता ग्रन्थेन प्रधानकारणवादो दुर्वादतां नीतः। इदानीं परमाणुकारणवादमपवदितुमुपक्रमः। असमञ्जसमिति पूर्वसूत्राद्ग्राह्यम्। वेति चार्थे। परिमण्डलं परिमाणविशिष्टः परमाणुः। तच्च नित्यम्। तथा हि "नित्यं परिमण्डलम्॥" (वैशे० ७।१।२०॥) "व्यवहारसिद्धः परिमाणविशेषो ह्रस्वम्। वैशे० ७।१।१७॥ तच्च द्व्यणुकत्वेन प्रसिद्धम्। ह्रस्वपरिमण्डलाभ्यां द्व्यणुकपरमाणुभ्यां महद्दीर्घवत्, त्र्यणुकोत्पत्तिवादवत् अन्यदपि परमाणुकारणवादिभिरनुमतमसमञ्जसम्। अयं भावः। मनोभिन्नत्वे सति परमाणुत्वपरिमाणवान् परमाणुः। द्व्यणुकोवयवजन्यो महदारम्भकत्वात् कपालवत्। प्रलयान्ते हि परमेश्वरो जगत्सिसृक्षति। तत्सिसृक्षया हि सर्वे परमाणवः क्रियावन्तो भवन्ति। ततश्च सजातीययोर्द्वयोः परमाण्वोः क्रियोपपद्यते। ततश्चासंख्याता द्व्यणुका जायन्ते। सर्वेषां भावकार्याणां समवाय्यसमवायिनिमित्तानि कारणानि भवन्ति। तत्र द्व्यणुकरूपकार्यस्य द्वयोः परमाण्वोः समवायिकारणत्वम्। तयोश्च क्रियाजन्यः परस्परसंयोगसम्बन्धो द्व्यणुकस्यासमवायिकारणम्। परमेश्वरादीनि साधारणानि नव तत्र निमित्तकारणानि भवन्ति।

द्व्यणुकोत्पत्त्यनन्तरं द्व्यणुकेष्वपि क्रिया उत्पद्यन्ते। ताभिश्च सजातीयानां त्रयाणां त्रयाणां परस्परं संयोगसम्बन्धो भवति। तेन च त्र्यणुकरूपकार्याण्युत्पद्यन्ते। तान्यप्यसंख्यातानि भवन्ति। तत्र त्र्यणुककार्ये त्रयो द्व्यणुकाः समवायिकारणतां भजन्ते। त्रयाणां द्व्यणुकानां परस्परं संयोगसम्बन्धोसमवायिकारणतां भजते। परमेश्वरादयश्च नव निमित्तकारणतामाश्रयन्ते। ततश्च त्र्यणुकेष्वपि क्रियोत्पत्तिर्भवति। तया च क्रियया तेषां सजातीयानां चतुर्णां चतुर्णां त्र्यणुकानां परस्परं संयोगसम्बन्धो जायते। ततश्च चतुरणुका अप्यसंख्याता उत्पद्यन्ते। तत्र चत्वारस्त्र्यणुकाः समवायिकारणम्। तेषां परस्परं संयोगश्चासमवायिकारणम्। परमेश्वरादयश्च नव निमित्तकारणम्। एवं ते पञ्च चतुरणुकाः पञ्चाणुकं स्थूलतरं कर्म जनयन्ति। पञ्चाणुकाश्च ते मिलित्वा स्थूलतमं कार्यमुत्पादयन्ति। एवं च पूर्वपूर्वकारणापेक्षयोत्तरोत्तरस्थूलकार्योत्पत्तिक्रमेण महती पृथिवी महज्जलं महत्तेजो महांश्च वायुरुत्पद्यते। द्वयोः परमाण्वोरिव त्रयः परमाणवो द्व्यणुकरूपकार्यं त्रयो द्व्यणुका इव च द्वौ द्व्यणुकौ त्र्यणुकरूपकार्यं तु नारभन्ते। गौरवात्प्रमाणाभावाच्च। द्व्यणुकेषु त्र्यणुकरूपकार्यस्यारम्भकत्वे गौरवात्। द्व्यणुकयोरेव त्र्यणुकरूपकार्यस्यारम्भकत्वस्वीकारे यद्यपि लाघवं तथापि द्व्यणुकाभ्यां त्र्यणुकरूपपदार्थोत्पत्तिस्वीकारे तत्र महत्परिमाणत्वं न प्राप्नोति। तदभावे च त्र्यणुकस्य चाक्षुषं न

स्यात्। कार्ये महत्त्वपरिमाणोत्पादे कार्यस्य, समवायिकारणस्य महत्त्वमसमवायि कारणं भवति। समवायिकारणस्य बहुत्वसंख्या वा। द्व्यणुकरूपकारणे महत्त्वाभावात्-महत्परिमाणाभावात् परमाणुत्रयं यथा प्रत्यक्षीक्रियते न तथा द्व्यणुकस्य प्रत्यक्षज्ञानं भवति। द्व्यणुकरूपकारणस्थाणुत्वपरिमाणेन त्र्यणुकरूपकार्योत्पत्तिस्वीकारे त्र्यणुकपरिमाणं द्व्यणुकपरिमाणापेक्षयाणुतरमेव स्यात् ततश्च प्रत्यक्षत्वं न स्यात्। अतो द्व्यणुकरूपसमवायिकारणस्थपरिमाणजन्यता न त्र्यणुकेमहत्त्वपरिमाणे हेतुः, किन्तु द्व्यणुकरूपकारणस्थया बहुत्वसंख्ययैव त्र्यणुके महत्परिमाणं जन्यते। सा च बहुत्वसंख्या त्रित्वाद्यवच्छिन्नेष्वेवावतिष्ठते न द्वित्वावच्छिन्ने। ततत्र्यणुकरूपकार्ये महत्परिमाणोत्पत्तये त्रिभिरेव द्व्यणुकैस्त्र्यणुकरूपकार्यस्योत्पत्तिः स्वीक्रियत इति नैयायिकानां पन्थाः।

इत्थं च तन्त्वादयोवयवाः स्वांशैः षड्भिः पार्श्वैः संयुज्यमाना अवयविनमुत्पादयन्ति। तथैव परमाणवोपि स्वकीयैः षड्भिः पार्श्वैः संयुज्यमाना एव द्व्यणुकादीनुत्पादयेयुः। परमाणूनां प्रदेशभेदाभावे सति सहस्राधिकपरमाणुसंयोगोप्येकस्मात्परमाणोरनतिरिक्तपरिमाणतयाणुत्वह्रस्वत्वमहत्त्वदीर्घत्वाद्यसिद्धिः स्यात्। स्वीक्रियते चेत्प्रदेशभेदः परमाणवोपि सांशाः स्वकीयैरंशैः। ते च स्वकीयैरंशैः। एवं च ह्रस्वपरिमण्डलाभ्यां महद्दीर्घाणुह्रस्वोत्पत्तिवत् अन्यत् तदभ्युपगतं सर्वमसमञ्जसमिति ॥ २।२।१० ॥

उभयथापि न कर्मातस्तदभावः ॥
२।२।११ ॥

परमाणुद्व्यणुकत्र्यणुकादिक्रमेण जगत्सृष्टिरिति परमाणुकारणवादिन उपयन्ति । यत्र या काचित् क्रिया स्पन्दनादिकापि भवति तत्रादृष्टस्य हेतुतेति भवताप्यभ्युपेयते । तत्रेदं निर्णेयं परमाणुषु यत्स्पन्दनादि भवति तत्स्वादृष्टकारितमात्मादृष्टकारितं वा ? परमाणूनामचेतनत्वान्न पूर्वः पक्षः । अवशिष्यते च स द्वितीयः । तत्र कस्यात्मनोदृष्टेन कुत्र किमुत्पन्नमित्यस्य न निर्णयसाधनम् । ननु मा भून्मानवस्य निर्णयात्मकं ज्ञानं तस्य, तेन किम् ? परमेश्वरः सर्वं विजानाति । पारमेश्वरे कर्मणि न सम्भवति जीवात्मनो गतिः । अल्पज्ञत्वात् । केनापि हेतुना यदि यत्किञ्चिद्येन केनाप्यवगम्यते चेत् तेन तत्कर्मैव नास्ति । मा तद्भवत्विति केन चोदितं भवेत् । ईश्वर एव सर्वज्ञः । स सर्वं जानीते । अतः सैवैश्वरी व्यवस्था प्रचलत्येव । मैवम् । यदीश्वरकर्मणः सम्भावितौचित्यं नावचीयते तस्मिन्नविश्वास उपचीयेतेति तु न वक्तुं शक्यम् । लोके जनुषान्धाः स्वान्धत्वकारणं न विजानन्ति । पङ्ग्वोपि स्वपङ्गुत्वकारणं न विदन्ति । मूर्खा मौर्ख्यस्य हेतुं नावकलयन्ति । सर्वत्रैवैश्वरीच्छा प्रवर्तते । तस्य न्याये जीवानां परमो विश्वासः । मैवं वद । ईश्वरक्रियास्वप्यौचित्यं तु साध्यमेव । भवतु । शृणु । परमाणुगतं कार्यं न परमाणुगतादृष्टकारितं न वात्मगतादृष्ट-

कारितम् । सृष्टेः सर्जनविसर्जनयोः परमेश्वरः परमः स्वतन्त्रः । जीवकृतकर्मफलं जीवाय दातुमेव स जीवकृतकर्मपारतन्त्र्यविषं विषहते । जगद्रचनायां स नैसर्गिकं नैपुण्यं धत्ते । तच्च मानवविज्ञातविज्ञानमतिक्रम्य तिष्ठतीति । नैतत् समीचीनम् । आत्मनोऽदृष्टस्य सदैव संनिहितत्वात्तदेव सृष्टेर्निमित्ततां वहेत् । अदृष्टस्य च प्रवाहो न निरुध्यते ततो नित्यसर्गसंसर्गं कः खलु निवारयेत् ? अतस्तदभावः—उभयथापि कारणासिद्धत्वेन जगदुत्पत्तेरभावः प्रसज्येत ॥ २।२।११ ॥

समवायाभ्युपगमाच्च
साम्यादनवस्थितेः ॥ २।२।१२ ॥

समवायस्याभ्युपगमाच्चापि काणभुजं मतमसमञ्जसम् । कुतः ? साम्यात्—समवायस्याप्यवयविजात्याद्युपपादकान्तरापेक्षासाम्यात्, अनवस्थितेः—अनवस्थाप्रसङ्गात् । अयं भावः अयुतसिद्धयोः सम्बन्धः समवायः । अवयवावयविनोर्गुणगुणिनोः क्रियाक्रियावतोर्जातिव्यक्त्योर्विशेषनित्यद्रव्ययोश्चायुतसिद्धत्वम् । ययोर्द्वयोर्मध्य एकमविनश्यदपराश्रितमेवावतिष्ठते तावयुतसिद्धाविति मतम् । उक्तं च, "घटादीनां कपालादौ द्रव्येषु गुणकर्मणोः । तेषु जातेश्च सम्बन्धः समवायः प्रकीर्तितः ।" अयुतसिद्धानामाधार्याधारभूतानां यः सम्बन्ध इह प्रत्ययहेतुः स समवायः इति प्रशस्तपादाचार्याः । अयुताः प्राप्ताश्च ते सिद्धाश्चेत्ययुतसिद्धाः । प्राप्ता एव सन्ति न वियुक्ता इत्यर्थः ।

तेषां सम्बन्धः प्राप्तिलक्षणः समवायः । यथा तन्तुपटयोर्घटकपालयोश्चेत्यादि । द्रव्यगुणकर्मसामान्यविशेषाणां कार्यकारणभूतानामकार्यकारणभूतानां वायुतसिद्धानामाधार्याधारभावेनावस्थितानामिहेदमितिबुद्धिर्यतो भवति यतश्चासर्वगतानामधिगतान्यत्वानामविष्वग्भावः स समवायाख्यः सम्बन्ध इत्यपि समवायपदार्थनिरूपणप्रस्तावे प्रशस्तपादाचार्याः । अत्र कार्यकारणभूतानामकार्यकारणभूतानामिति नियमोक्तिः । तथा च, अवयवावयविनामनित्यद्रव्यतद्गुणानां नित्यद्रव्यतत्समवेतानामनित्यगुणानां कर्मतद्वतां च कार्यकारणभूतानां नित्यद्रव्यतद्गुणानां सामान्यतद्वतामन्त्यविशेषतद्वतामकार्यकारणभूतानां चायुतसिद्धानां समवायो भवतीति नियम एवेति तत्रैवोपस्कारग्रन्थः । समवायसत्त्वे प्रमाणं त्वनुमानम् । तच्च जात्यादिगोचरो विशिष्टव्यवहारः सम्बन्धनियतः । भावमात्रविषयाबाधितविशिष्टव्यवहारत्वात् । सघटं भूतलमिति व्यवहारवत् (न्या०ली०)। घटे घटत्वं रूपं च समवेतम्, तन्तुषु पटः समवेतः, इह कर्म समवेतम् इत्यनुगतसमवायाकारमतीत्या तत्सिद्धिरिति न्यायमञ्जरी । सर्वत्र समवायस्तु एक एव नित्यश्चेतिन्यायवैशेषिकसिद्धान्तः । एकत्वं च स्वाश्रयान्योन्याभावासमानाधिकरणपदार्थविभाजकोपाधिमत्त्वम् (प्र० च०)। समवायस्यैकत्वसाधने "तत्त्वं भावेन" (वै० ७।२।२८) इति सूत्रम् । नित्यत्वे त्वनुमानम् । तच्चेत्थम्—समवायो नित्यः, अकारणकत्वात् । भावानां हि

समवायिकारणादुत्पत्तिनियमः । तदनुरुद्धे च निमित्तासमवायिनी इति । तथा च समवायस्य समवायिकारणकल्पनेनवस्थादिदोषप्रसङ्ग इति समवायस्य नित्यत्वमिति समवायं स्वीकुर्वतां पन्थाः । तत्र दोषाभिधानम्—अनवस्थितेः । समवायस्य समवायिकारणं किम् ? तस्य समवायिकारणं किम् ? तस्य च किम् ? इत्यनया रीत्या परम्परानुबन्धाप्रतिबन्धादनवस्थादोषसम्प्राप्तेः समवायास्वीकार एव मोक्षमार्गः ॥२।२।१२॥

नित्यमेव च भावात् ॥२।२।१३॥

नित्यत्वे दोषान्तरमपि । समवायसम्बन्धस्य नित्यत्वे जगतः सम्बन्धिनोपि नित्यत्वमेव स्यात् । जगन्नित्यत्ववारणाय समवायानित्यत्वं तु न शक्यते समर्थयितुम् । परमतप्रवेशप्रसङ्गात् । अतोयं प्रत्यक्षविरोधः । एवं च समवायासिद्धौ समवेतद्व्यणुकादेरप्यसिद्धत्वाज्जगदनुन्मेषप्रसङ्गः॥ २।२।१३॥

रूपादिमत्त्वाच्च विपर्ययो
दर्शनात् ॥२।२।१४॥

काणभुजानां नैयायिकानां च मते नित्याः परमाणवः । तत्र सूत्रम्—"सदकारणवन्नित्यम्" (वै० ४।१।१) । यत् सत् सत्तायोगि भवति, अकारणवच्च भवति तन्नित्यमित्यर्थः । सत्तायोगित्वादकारणवत्त्वाच्च परमाणूनां नित्यत्वम् । निर-

वयवत्वादपि तेषां नित्यत्वम् । यतोवयवात्कार्यत्वं निवर्तते तत्र सावयवत्वमपीति निरवयवपरमाणुसिद्धिरिति (उपस्कारः ४।१।२)। निरवयवं द्रव्यमवधिः स एव परमाणुः। यदि स निरवधिः स्यान्मेरुसर्षपयोः परिमाणभेदो न स्यात्। अनन्तावयवारब्धत्वाविशेषात् । परमाणूनां निरवयवत्वेपि रूपादिमत्त्वम् । "कारणभावात् कार्यभावः" (वै० ४।१।३) इति सूत्रं तत्र प्रमाणम् । तत्रोच्यते—रूपादिमत्त्वात्परमाणूनां विपर्ययो नाशवत्त्वमनित्यत्वं प्रतीयते । कुतः ? दर्शनात् । यत्र रूपादिमत्ता दृश्यते तत्रानित्यत्वमपि दृश्यते। यथा घटादयः। तेषु रूपवत्त्वादनित्यत्वम् । तथा च त्वदभिमत-नित्यत्वसिद्धिरेव न स्यात् ॥२।२।१४॥

उभयथा च दोषात् ॥२।२।१५॥

चः समुच्चयार्थकः। उभयथा परमाणूनां रूपादिमत्त्वे-नित्यत्वम् । रूपाद्यभावे पृथिव्यादीनामपि रूपशून्यत्वम् । कारणगुणपूर्वको हि कार्यगुणो दृष्टः। अत उभयथा दोषाद्दोष-सत्त्वादसमञ्जसमिति दूरादनुकर्षणीयम् ॥२।२।१५॥

अपरिग्रहाच्चात्यन्तमनपेक्षा ॥२।२।१६॥

दूषितस्य काणादपक्षस्यापरिग्रहाद्वैदिकैरस्वीकार्यत्वा-दत्यन्तमनपेक्षा व्यासस्य। न च कथं काणादमतं दूषितम् ? परमाणूनां वेदैः स्वीक्रियमाणत्वात्। तथा हि "सं बाहुभ्यां भरति सं पतत्रैर्द्यावापृथिवी जनयन्देव एकः" (अथ० १३।२।२६) इत्यनेन वचनेनेति। उच्यते। नेदं प्रमाणं

परमाणुसत्त्वे । पतत्त्रैः सर्वत्र पतनशीलैर्गमनशीलैः स्ववीर्यै-रित्यर्थो न तु परमाणुभिरिति ॥२।२।१६॥

(इति महद्दीर्घाधिकरणम्–२)

– ० –

(अथ समुदायाधिकरणम्–३)

समुदाय उभयहेतुकेपि तदप्राप्तिः ॥२।२।१७॥

माध्यमिका योगाचाराः सौत्रान्तिका वैभाषिकाश्चार्वाका-श्चैते सर्वे एवावैदिकवर्त्मानुयायिनः । दिगम्बरा अपि तथा । इदानीं तेषां मतं क्रमेण निरस्यन्नाह–समुदाय इति । अत्रेदं ध्येयम्–माध्यमिकाः शून्यवादिनः सन्ति । अहं नास्मीति सुषुप्तावनुभवाच्छून्य एवात्मेति सिध्यति । न केवलमेतदेव सर्वं जगदेव शून्यम् । सुषुप्तौ कस्यापि पदार्थस्याप्रतीतेः । अतः शून्य एवात्मेति तेषां मतम् । योगाचारः क्षणिकविज्ञानवादी । तन्मते विज्ञानमेवात्मा । तच्च स्वप्रकाशरूपत्वाच्चेतनं मात्र-रूपत्वाच्च क्षणिकम् । क्षणिकविज्ञानं द्विधा प्रवृत्तिविज्ञान-मालयविज्ञानं चेति । अयं घटः, अयं पट इत्यादिविज्ञानं प्रवृत्तिविज्ञानम् । अहमहमितिविज्ञानमालयविज्ञानम् । आलय-विज्ञानमेवात्मा । ननु क्षणिकविज्ञानस्यात्मत्वे सुषुप्तौ स न सिध्येत्–सुषुप्तेः पूर्वमुत्पन्नस्य तद्विज्ञानस्य क्षणिकतया तन्नाशस्य नियतत्वात् सुषुप्तौ चान्यस्य विज्ञानस्योत्पादका-भावान्न तत्र विज्ञानोत्पत्तिसंभवः । अत्र समाधत्ते–पूर्व-

पूर्वविज्ञानमेवोत्तरोत्तरविज्ञाने हेतुः । प्रथमक्षण उत्पन्नं सत्तद्विज्ञानं द्वितीयस्मिन् क्षणे स्वसजातीयमपरं विज्ञानमुत्पाद्य स्वयं विनश्यति । एवं द्वितीयविज्ञानं तृतीयस्मिन् क्षणे स्वसजातीयं तृतीयं विज्ञानमुत्पाद्य स्वयं विनश्यति । एवं पूर्वपूर्वविज्ञान उत्तरोत्तरविज्ञानस्य हेतुत्वाद्विज्ञानधारा सार्वदिक्येव स्यात् । यद्यपि सुषुप्तौ प्रवृत्तिविज्ञानधाराभावस्तथाप्यालयविज्ञानधारा तु तिष्ठत्येव । सैवात्मा । सुषुप्तावपि विज्ञानात्मा विद्यत एवेति । ननु विज्ञानस्य क्षणिकत्वेन तदाश्रितसंस्काराणामपि क्षणिकत्वेन पूर्वानुभूतस्य वस्तुनः कालान्तरे स्मरणाभावप्रसङ्ग इति चेन्न । वस्त्रपुटैर्वेष्टितस्यापि मृगमदस्य गन्धो यथा सर्वमावृतं वस्त्रं व्याप्नोति तथैव पूर्वपूर्वविज्ञानजनितसंस्काराणामुत्तरोत्तरविज्ञाने सम्प्राप्तिर्निराबाधैवेति । एवं च पूर्वानुभूतस्य वस्तुनस्तत्तत्संस्कारबलात्कालान्तरेपि स्मरणं निर्बाधम् । यद्यपि विज्ञानस्येव तेषां संस्काराणामपि क्षणिकत्वेन स्मृतिज्ञानं यावत्तेषां संस्काराणां स्थित्यसंभवस्तथापि तस्मिन्नुत्तरोत्तरविज्ञाने पूर्वपूर्वसंस्काराणां सजातीयसंस्कारोत्पत्तिसंभव एवेति ।

सौत्रान्तिकास्तु—संवेदनगतो विषयाकारप्रतिबिम्बस्तथाविधबिम्बसन्निधानपुरस्सरः, प्रतिबिम्बत्वात्, दर्पणादिगतमुखादिप्रतिबिम्बवदित्याकारकानुमानेनायं घट इतिविज्ञाने घटाकारः प्रतीयते पटोयमिति विज्ञाने च पटाकारः

प्रतीयते । एवं सर्वेष्वेवोत्पन्नतत्तद्विज्ञानेषु तत्तदाकारः प्रतीयत एव । तत्र यदान्तरविज्ञानस्थघटपटाद्याकाररूप-वैचित्र्यं तद्बाह्यदेशस्थिततत्तद्घटपटादिरूपार्थस्य सादृश्यमेव भजते । तद्बाह्यार्थसादृश्यमन्तरेण विज्ञाननिष्ठवैचित्र्यस्य न किञ्चिदपरं स्वरूपं सिध्यति । बाह्यघटपटाद्यर्थस्वीकार-मन्तरेण तत्तदान्तरविज्ञाने तत्तद्घटपटाद्यर्थसादृश्योत्पत्ते-रेवासंभव इति ।

वैभाषिकाणामयं सिद्धान्तः—तत्तद्घटपटाद्यर्थैः सह यदि तत्तद्विज्ञानस्य सम्बन्धो न स्यात्तत्तद्विज्ञानेषु तत्तद्बाह्यार्थाकारतैव न स्यात् । तस्मात्तद्विज्ञानस्य तत्तद्बाह्यार्थैः सह सम्बन्धस्त्ववश्यं स्वीकर्तव्यः । ततश्च प्रकाशरूपविज्ञानस्य तत्तद्घटादिबाह्यार्थैः सह सम्बन्धात्तेषां बाह्यार्थानां प्रकाशः स्यात् । ततस्तद्बाह्यार्थानां प्रत्यक्ष-ज्ञानस्यापि विषयत्वमिति । एवं च सौत्रान्तिकवैभाषिकम-तयोर्यत्किञ्चिद्वैलक्षण्ये सत्यप्यान्तरविज्ञानाद्भिन्नानां बाह्य-घटपदादीनां स्वीकारः समान एव ।

अत्र सूत्रेणानेन बाह्यार्थास्तित्ववादिनां मतं निरस्यते । उभयहेतुकेपि समुदाये तदप्राप्तिः—अणुहेतुके पृथिव्यादिसमुदाये पृथिव्यादिहेतुके शरीरेन्द्रियसमुदाये च तदप्राप्तिः समुदायाप्राप्तिः । अयं भावः—बाह्यवस्तुसद्भावं स्वीकुर्वतो-वैभाषिकसौत्रान्तिकयोर्जगदुत्पत्तिप्रकारो लोकव्यवहारश्च

सुतरां निर्वोढव्यः । तथा हि पार्थिवाप्यतैजसवायवीया गन्धादियुक्ताः परमाणवो हि पृथिव्यादिरूपेण संहता भवन्ति । भूतेभ्यश्च शरीरेन्द्रियविषयलक्षणसंघाताः । तत्र च शरीरान्तर्वर्तमानं विज्ञानसन्तानमेवात्मत्वेन स्थितिमुपलभते । तत एव सर्वे व्यवहाराः प्रवर्तन्ते इतिपूर्वपक्षिहृदयम् । तत्रोच्यते । उभयहेतुकेपि समुदाये तदप्राप्तिः= जगदात्मकसमुदायोत्पत्तिर्नोपपद्यते क्षणिकत्वाभ्युपगमादिति ॥२।२।१७॥

इतरेतरप्रत्ययत्वादुपपन्नमिति चेन्न संघातभावानिमित्तत्वात् ॥२।२।१८॥

सत्यम्, यद्यपि पदार्थानां क्षणिकत्वाभ्युपगमस्तथाप्यविद्याया इतरेतरहेतुस्वीकाराल्लोकव्यवहार उपपद्यते । अविद्या रागद्वेषादिकं जनयति । ततो विज्ञानं ततश्च चित्तचैत्ताः पृथिव्यादिकं च रूपि द्रव्यम् । तत इन्द्रियषट्कम् । ततः स्पर्शाख्यः कायः । ततो वेदनादयः । ततश्च पुनरविद्याद्याः । एवं चानादिरेषा चक्रगतिः । एतत्सर्वं नैवोपापत्स्यत यदि पृथिव्यादिभूतभौतिकसंघातो नाभ्रमंस्यतेति चेन्न । संघातभावानिमित्तत्वात् । अविद्यादीनां पृथिव्यादिभूतभौतिकसंघातभावे निमित्तत्वाभावात् । नह्यविद्या अविद्यानिमित्तका रागादयो वा क्षणिकस्य संहतिहेतुतां भजन्ते । न हि शुक्तिकायां रजतबुद्धिः शुक्त्याद्यर्थसंहतिहेतुर्भवति ।

न हि रज्जौ सर्पबुद्धी रज्ज्वाद्यर्थसंहतिहेतुर्भवति । अपि च यस्य क्षणिके स्थिरतत्त्वबुद्धिः स तु तदैव नष्ट इति कस्य रागादयो जायन्ताम् । संस्कारानुवृत्तिकल्पनमपि तत्र न युक्तम्, स्थिरस्यैकस्य द्रव्यस्यानभ्युपगमात् ॥२।२।१८॥

उत्तरोत्पादे च पूर्वनिरोधात् ॥२।२।१९॥

जगदुत्पत्तिरपि नोपपन्ना भवति क्षणिकवादिनाम् । यदोत्तरक्षणोत्पत्तिर्भवति ततः पूर्वमेव पूर्वक्षणस्य विनष्टस्योत्तरक्षणे हेतुताभावात् । अभाव एव हेतुरित्युच्यते चेत्सर्वस्य सर्वत्र सदैवोत्पत्तिप्रसङ्गः स्यात् । पूर्वक्षणवर्तिनो यस्य कस्यापि हेतुत्वस्वीकारेविशेषेणोत्तरक्षणवर्तिनो यस्य कस्यापि हेतुत्वं स्यात् । तच्च न युक्तम् । लोकशास्त्रविरोधप्रसङ्गात् ॥ ॥२।२।१९॥

असति प्रतिज्ञोपरोधो यौग-
पद्यमन्यथा ॥२।२।२०॥

मा भूद्धेतुः, कार्यं तूत्पत्स्यत एवेति चेन्न । प्रतिज्ञोपरोधः संजायेत । अधिपतिसहकार्यालम्बनसमनन्तरप्रत्ययाश्चत्वारो विज्ञानोत्पत्तौ हेतव इति युष्माकं प्रतिज्ञा । तस्या उपरोधो विरोधः स्यात् । यौगपद्यमपि स्यात् । किमिति यौगपद्यम्? यौगपद्येनोपलब्धेरिति । कस्य? शृणु । मा भूत्प्रतिज्ञोपरोध इति स्थित एव घटक्षणे घटक्षणान्तरोत्पत्तिरिष्यते । तथा सति द्वयोः कार्यकारणयोर्यौगपद्येनोपलब्धिः स्यात् ।

न च भवति तथा। स्याच्चेत्तथा क्षणिकत्वप्रतिज्ञा स्यादेव विगतप्राणेति ॥२।२।२०

प्रतिसंख्याप्रतिसंख्यानिरोधा-
प्राप्तिरविच्छेदात् ॥२।२।२१॥

प्रतिसंख्याप्रतिसंख्यानिरोधाप्राप्तिश्च स्यात् । कोसौ प्रतिसंख्याप्रतिसंख्यानिरोध इति। शृणु। भावानां बुद्धिपूर्वको विनाशः प्रतिसंख्यानिरोध इति। तद्विपरीतोप्रतिसंख्या-निरोध इति। अथवा स्थूलविनाशः प्रतिसंख्या। सूक्ष्मविनाशो-प्रतिसंख्या। मुद्गराभिघाताद्यनन्तरभाव्युपलब्धियोग्यः स्थूलविनाशः। प्रतिक्षणभाव्युपलब्ध्यनर्हः सूक्ष्मविनाशः। निरोधो निरन्वयविनाशः। तयोरप्राप्तिः स्यात्–असंभवः स्यात्। कपालादिभावरूपावस्थाप्राप्तेरेव विनाशशब्दार्थः। सतो द्रव्यस्य चाविच्छेदात् ॥२।२।२१॥

उभयथा च दोषात् ॥२।२।२२॥

प्रतिसंख्यानिरोधस्वीकारो वा स्यादप्रतिसंख्यानिरोध-स्वीकारो वा स्यात् उभयथा दोषः। कश्चासौ? उच्यते। स्थूलो विनाशः प्रतिसंख्यानिरोधः। सूक्ष्मो विनाशोप्रति-संख्यानिरोधः। यदि प्रतिसंख्यानिरोधोप्रतिसंख्यायाः सत्त्वेन तवैव चिन्तासत उत्पत्तिमभिप्रेयतः। यद्यप्रतिसंख्या-निरोधः, न स्यात्पुनर्जगत उत्पत्तिः। नासतः सद्भाव इति-दर्शनात्। एवमत्र वेदितव्यम्–सर्वास्तित्ववादिनां मतेसंस्कृत-

धर्माणां प्रकारत्रयम्; आकाशं प्रतिसंख्यानिरोधोप्रतिसंख्यानिरोधश्चेति। आकाशमनावृतिः। यन्नाव्रियते न चावृणोति तदाकाशमुच्यते। आकाशं धर्मतया निर्दिश्यते। तच्च नित्यमसंस्कृतधर्म चास्ति। नेदं शून्यम्। भावात्मकः पदार्थः। प्रज्ञेति प्रतिसंख्याशब्दार्थः। उत्पन्नानां सास्रवधर्माणां पृथक् पृथग्वियोगः प्रतिसंख्यानिरोध उच्यते। प्रज्ञोदये कस्मिन्नपि सास्रवधर्मरागः साकल्येन परित्यक्तो भवति तदा तत्सास्रवधर्मस्य प्रतिसंख्यानिरोध उदेति। यथा सत्कायदृष्टिः सर्वेषामेव क्लेशानां जनिका। अतो ज्ञानद्वारा तस्याः सर्वथा निरोधोसंस्कृतधर्मस्य स्वरूपम्। विनैव प्रज्ञया निरोधोप्रतिसंख्यानिरोधः। पूर्वोक्त एव निरोधः प्रज्ञां विनैव स्वाभाविकतयोत्पद्यते तदा सोप्रतिसंख्यानिरोध इत्युच्यते। प्रतिसंख्यानिरोधे दुःखानां पुनरुत्पत्तिः संभाव्यते। अप्रतिसंख्यानिरोधे च दुःखानामनुत्पाद एव भवति ॥२।२।२२॥

आकाशे चाविशेषात्।

आकाशं चापि निरुपाख्यमिति तेषामभिमतिः। तन्निराक्रियत आकाशे चेति। नाकाशे निरुपाख्यता प्रतिपादनीया। तस्यापि भावरूपत्वेनाबाधितप्रतीतिसिद्धत्वाविशेषात्। आकाशस्य प्रतीतिस्तु निर्बाधा। आकाशे नक्षत्राणीतिप्रतीतिस्तु सर्वजनीना। वेदेपि प्रसिद्धिरस्य। तथा हि "नभो न रूपमरुषं वसानाः" (ऋ० ७।९७।६) "यत्पर्जन्यः कृणुते वर्ष्यं

नभः" (ऋ० ५।८३।३) "आमन्वन्नभो दुह्यते घृतं पयः" (ऋ० ९।७४।४) "नभो वसानः परि यास्यध्वरम्" (ऋ० ९।८३।५) इत्यादिः। केषाञ्चिन्मत आकाशस्य चाक्षुषत्वमपि ॥२।२।२३॥

अनुस्मृतेश्च ॥२।२।२४॥

अनुस्मृतिः प्रत्यभिज्ञानम्। पूर्वदृष्टं वस्तु पुनर्यदाकदा दृष्ट्वा तदेवेदमिति प्रत्यभिज्ञा जायते। यदि वस्तूनां क्षणिकत्वं तदेवेदमिति प्रत्यभिज्ञानं न स्यात्। कृतविप्रणाशाकृताभ्युपगमावपि स्यातां क्षणिकत्ववादे। देवदत्तेन यत्पूर्वक्षणे कृतमुत्तरक्षणे तद्विनष्टम्। उत्तरक्षणे यद्दुःखसुखाद्युपजायते निरालम्बनमेव तत्स्यात्। ननु पूर्वकालकृता कृतिः पूर्वकाले विनष्टा, कार्यं तु कृतमवतिष्ठत एवेति। न हि। क्षणिकत्ववादाभ्युपगमे सा कृतिरपि विनष्टैव। तर्हि वर्तमाने कस्याः कृतेः फलमनुभूयते जीवेनेति ? कर्मफलभोगाय हि प्राणिनां जन्म। क्षणिकवादे कथमपि नास्योपपत्तिः। मोक्षप्राप्त्य एव बुद्धपथेप्याष्टाङ्गिकमार्गविधानम्। कर्मणां तत्फलानां च क्षणिकत्वान्मोक्षावाप्तेरसंभव एव। निरोधगामिनी प्रतिपद्व्यवस्थाप्यनवस्थां सम्पद्येत। स्मृत्यनुभूतिकर्त्रोरैक्यं लोकव्यवहारसिद्धम्। तच्चात्रासिद्धम्। अनुभविता चैत्रः क्षणादुपरि विनष्टः। स्मर्ता चाद्यतनः। असम्बद्धमेव सर्वम्। प्रत्यभिज्ञापि च न सिध्येत्। अत्र स्मर्यते स्याद्वादमञ्जरी-

यत्र दृश्यतेयं श्लोकः--"न तुल्यकालः फलहेतुभावो हेतौ विलीने न फलस्य भावः। न संविदद्वैतपथेर्थसंविद्विलून-शीर्णं सुगतेन्द्रजालम्" इति। "नास्यात्मा फलभोगमात्रमथ च स्वर्गाय चैत्यार्चनं, संस्काराः क्षणिका युगस्थितिभृतश्चैते विहाराः कृताः। सर्वं शून्यमिदं वसूनि गुरवे देहीति चादिश्यते, बौद्धानां चरितं किमन्यदियतो दम्भस्य भूमिः परा॥" इति च न्यायमञ्जर्यां जयन्तभट्टः॥२।२।२४॥

नासतोदृष्टत्वात्॥२।२।२५॥

ज्ञानोत्पत्तिकालेर्थस्याभावान्न हि कोप्यर्थो ज्ञानविषयतां लभत इति खण्डनवाक्यार्थं स्मृत्वा सौत्रान्तिकः प्रत्यवतिष्ठते—"अर्थः विनश्यन्स्वाकारं ज्ञानेर्पयति। घटज्ञानेनार्थो न घटे-नेदानीं ज्ञानकाले। घटाभावेपि बहुशो घटज्ञानस्फुरणस्य दर्शनात्। अत्राह—नासतोदृष्टत्वादिति—असतोभावं गतस्य यस्य कस्यापि धर्मिणो धर्मस्फुरणं नैव दृश्यते। विनष्टस्य घटस्य यत्स्फुरणं तत् स्मृतिज्ञानं भवतीति। श्रीजानकी-कृपाभाष्यसंक्षिप्तसारे तु "नासतो दृष्टत्वात्" इति नञा विरहितोपि पाठः स्वीकृतः। तथा च दृष्टत्वादित्यस्य सत एव मृदादेर्घटादिकार्योत्पत्तेर्दृष्टत्वादित्यर्थ इति व्याख्यातम्॥ २।२।२५॥

उदासीनानामपि चैवं सिद्धिः॥२।२।२६॥

यदि क्षणिकत्वं वस्तूनाम्, असदुत्पत्तिः पदार्थमात्रस्या-हेतुको विनाशश्चेत्यादीनामभ्युपगम उदासीनानामपि किञ्चि-

दकुर्वाणानामपि सर्वस्वेष्टार्थसिद्धिर्निराबाधा स्यात्। वैभाषिकसौत्रान्तिकयोर्द्वयोरपि श्रौतसिद्धान्तान्तकयोर्दूषणमिदं साधारणम् ॥२।२।२६॥

इति समुदायाधिकरणम्—३

— ० —

अथोपलब्ध्यधिकरणम्—४

नाभाव उपलब्धेः ॥२।२।२७॥

विज्ञानमात्रास्तित्ववादिनो योगाचारा अर्थवैचित्र्यकृतं ज्ञानवैचित्र्यमिति नाङ्गीकुर्वन्ति। अर्थानामिव ज्ञानानामपि स्वाभाविकवैचित्र्यात्। तत्र वैचित्र्ये वासना हेतुः। वासना च पूर्वज्ञानादुत्तरज्ञाने जाता शक्तिः। यद्घटाकारज्ञानं कपालाकारज्ञानं जनयति तस्य तथाविधस्य जनकं तत्पूर्वघटज्ञानम्। "वासना च तस्य च तथाविधस्योत्पादकं ततः पूर्वघटज्ञानमित्येवंरूपः प्रवाह एव" इति श्रीभाष्यकाराः। नन्वल्पपरिमाणमहापरिमाणवन्तः पदार्थास्तु बहिस्तिष्ठन्ति तेषां ज्ञानं त्वान्तरं भवति। कथं तर्हि तेषामाकार आन्तरज्ञानाकार इत्युच्यते ? उच्यते। ज्ञानप्रकाशेनैवार्थेषु व्यवहारयोग्यता भवति। ज्ञानं च तत्साकारम्। निराकारस्य प्रकाशकयोग्यताभावात्। ज्ञानार्थयोः सहैवोपलम्भो भवति। ततो ज्ञानादनतिरिक्तोर्थः स्वीकर्तव्यः। एवं चार्थसरूपं रूपमवश्यं स्वीकर्तव्यम्। इत्थं च सर्वव्यवहाराः सोपपत्तिका भवन्ति। तदतिरिक्तार्थकल्पना न प्रमाणमवलम्बते। ततो विज्ञानादतिरिक्तो न हि तत्त्वभूतः

कश्चिद्बाह्योर्थो विद्यत इति । अत्रोच्यते—नाभाव उपलब्धे-रिति । यदुक्तं ज्ञानातिरिक्तोर्थो न विद्यते, तन्न । कुतः । उपलब्धेः—बहिष्ठानां पदार्थानां सर्वप्रामाणिकजनप्रतीतेः । घटमहं जानामीति प्रतीत्या ज्ञानमात्रमेव परमार्थ इति वदतां वचनं न सुवचनम् । यदि ज्ञानमात्रं परमार्थस्तर्हि ज्ञातर्यपरमार्थत्वमङ्गीकर्तव्यम् । एवं चापरमार्थे ज्ञातरि ज्ञाय-मानं ज्ञानं परमार्थ इति कया रीत्या युक्त्या च साधयितुं शक्यते ? न हि कामलारोगदूषितनयनेन श्वेतवस्त्रमुद्दिश्य पीतमिदमिति प्रस्थापनं प्रमाणपदवीमारोहति । न वा जनुषान्धेन चन्द्रोयं रक्त इत्युक्तं विश्वासास्पदं भवति । एवं वेदतत्त्वार्थज्ञानविहीनेन केनापि हीनेन यद्वा तद्वा जल्पितमनल्पमपि न स्वल्पमपि प्रामाण्येन कल्पनीयम् ॥ २।२।२७॥

वैधर्म्याच्च न स्वप्नादिवत् ॥२।२।२८॥

स्वाप्नं ज्ञानं निरालम्बनं भवति । तद्दृष्टान्तेन जागरित-ज्ञानमपि निरालम्बनमेवेति साधयन्तं प्रत्युच्यते वैधर्म्याच्चे-ति—स्वप्नज्ञानं दृष्टान्तीकृत्य जागरितज्ञानस्य निरालम्बनत्वं न वक्तव्यम् । उभयोर्ज्ञानयोर्भेददर्शनात् । स्वप्नज्ञानं च निद्रादिदोषजन्यमत एव बाधितमपि भवति । जागरि-तज्ञानमभ्रान्तं न कथंचिद्बाध्यते । किं च त्वन्मते सर्वाण्येव ज्ञानान्यर्थशून्यानि भवन्ति तर्हि निरालम्बनानुमानस्या-

प्यर्थशून्यत्वमेव सिध्यति । अर्थवत्त्वे च तस्यानैकान्तत्वेनार्थशून्यत्वस्य सिद्धिरेव न स्यात् ॥२।२।२८॥

न भावोनुपलब्धेः ॥२।२।२९॥

अर्थशून्यस्य ज्ञानस्यानुपलब्धेः कथमपि कुत्राप्यप्रतीतेर्न भावः सम्भवति । न हि तादृशं ज्ञानं कुत्राप्युपलब्धं भवति यत्कर्तृविहीनं कर्मविहीनं च स्यात् । ननु स्वप्नज्ञानादीनामर्थशून्यता सर्वजनप्रसिद्धेति वाच्यम् । जागरितदशायां श्रुतदृष्टानुभूतार्थानामेव यत्किञ्चित्परिणामेन स्वप्नकाले स्वप्नमाहात्म्येनोन्मेषस्य स्वीकारात् ॥२।२।२९॥

इत्युपलब्ध्यधिकरणम् ॥४॥

—०—

(अथ सर्वथानुपपत्त्यधिकरणम् ॥५॥)

सर्वथानुपपत्तेश्च ॥२।२।३०

शिष्याणां योग्यतामनुसृत्य क्षणिकत्वादेरुपदेशः । वस्तुतस्तु शून्यवाद एव सर्वदोषरोषविरहितोस्माकमभिमतः । शून्यवादसिद्धान्ते न सर्वं सन्न वा सर्वमसत् । न वान्यथा । तदेवाह "न सन्नासन्न सदसन्न चाप्यनुभयात्मकम् । चतुष्कोटिविनिर्मुक्तं तत्त्वं माध्यमिका विदुः ॥" इति । अत एव वस्तुस्वरूपं सदसतोर्मध्यबिन्दावेव स्वाश्रयं लभते । तच्च शून्यरूपमेव । शून्यं नाभावस्वरूपम् । अभावत्वं हि सापेक्षं

भवति । अभावो भावमपेक्षते भावश्चाभावम् । शून्यस्तु परमार्थस्वरूपतया निरपेक्ष एव सन्तिष्ठते । शून्यमेवापरोक्षं तत्त्वम् । विभिन्नात्मकोयं प्रपञ्चः शून्यस्यैव विवर्तः । शून्यतत्त्वस्वरूपस्याज्ञेयतया येन केन रूपेणावर्णनीयतया च वर्णनातीतत्वमातिष्ठन्ते तज्ज्ञाः । उक्तं च "अस्तीति नास्तीति उभेपि अन्ता शुद्धी अशुद्धीति उभेपि अन्ता । तस्मादुभे अन्त विवर्जयित्वा मध्ये हि स्थानं प्रकरोति पण्डितः ॥" नागार्जुनेन माध्यमिककारिकायामुक्तम्—"अपरप्रत्ययं शान्तं प्रपञ्चैरप्रपञ्चितम् । निर्विकल्पमनानार्थमेतत्तत्त्वस्य लक्षणम्" इति । अपरप्रत्ययमन्येन प्रत्यायनानर्हम् । शान्तं स्वभावरहितम् । प्रपञ्चः शब्दः । तेनाप्रपञ्चितमबोध्यम् । निर्विकल्पं चित्ताचिन्तनीयम् । अनानार्थं निश्चितार्थम् । अतः सर्वप्रपञ्चविनिर्मुक्तिरेव शून्यस्वभावः । शून्यं नाभावात्मकम् । भावपदार्थो हि तत् । शून्यतैव प्रतीत्यसमुत्पादः । न च वस्तुतत्त्वनिषेधो न युक्तियुक्तः, युक्तिस्वरूपतया प्रयुक्तानां शब्दानामप्यसारत्वात् । यदि सारभूतत्वं तेषां स्वीकुरुषे स्वपक्षप्रतिषेधस्त्वयैव सम्पादितः स्यात् । अतो न केनापि प्रमाणेन शून्यता प्राप्तसत्ताका भवतीति वाच्यम् । स्वतःप्रमाणानां न केनापि प्रमाणेन साध्यत्वं स्यात् । यदि प्रमाणमपि केनाप्यन्येन प्रमाणेन साध्यते प्रमाणभावाद्धि तच्चयोतत एवेति शून्यवादिनः । अत्र पर्यवस्थानम् । सर्वथानुपपत्तेश्चेति । अनुपपत्तिश्चेत्थम्—सर्वं शून्यमिति भवतोच्यते । तत्र यदि किञ्चिदन्यन्नास्ति

कस्यार्थं सर्वमितिसर्वनामप्रयोगः ? सर्वं शून्यमित्यत्रास्तीत्यध्याहार्यमेव । शून्यमस्तीतिप्रयोगे शून्यस्य सत्ता स्वयमेव समायाति । स्वयमेव भवांश्च तामङ्गीकुरुते । तर्ह्यस्ति किञ्चित्तत्त्वमिति भवतोपि स्वीकारविषयः । एवं च नामनि भेदो न नामिनि । किं च शून्यमेव तत्त्वं नान्यदिति प्रतिपादयता भवतोदाहृतानां प्रमाणानां सत्यत्वमसत्यत्वमेव वास्थीयते ? यद्यसत्यत्वं, भवतः पक्षः सुतरामनुपपन्नः । यदि सत्यत्वं तर्हि समायातोस्मदीयः पन्थाः । अस्त्येव सत्यं ब्रह्म । तदीदृशमेवेयदेवेतिप्रकारतयेयत्तया च परिच्छेत्तुमशक्यमेव । किं च कस्य शब्दस्य स्वतःप्रामाण्यं भवता निरधारीति त्वद्यावध्यज्ञातमेव । यदि युक्तिशब्दस्यैव स्वतः प्रामाण्यं तर्ह्यविदिततत्त्व एव भवान् स्वतःप्रामाण्यस्य । न हि मानुषं वचः स्वतःप्रमाणपदवीमारोहति । तथा सति सर्वेषां विवेकिनामविवेकिनामपि च वचः स्वतःप्रामाण्यभाक्सत्कदाचिद्भवदभिमतं तत्त्वं निस्तत्त्वं स्यात् कदाचिच्चान्याभिमतं तत्त्वं तथात्वं भजेतेति सर्वं निष्प्रमाणकं सत् सर्वं स्याद्वा सर्वं न वा स्यादित्यन्धपरम्परा प्रतिपन्ना स्यात् । अतोनुपपत्त्यापि सर्वशून्यत्वं न निष्पन्नं भवतीति ॥२।२।३०॥

(इति सर्वथानुपपत्त्यधिकरणम्—५)

— ० —

(अथैकस्मिन्नसम्भवाधिकरणम्—६)

नैकस्मिन्नसम्भवात् ॥२।२।३१॥

अस्मिन्नधिकरणे जैनतत्त्वसत्त्वं निराक्रियते । जैनतत्त्वविवेक ईदृशः—जीवाजीवास्रवबन्धसंवरनिर्जरामोक्षास्तत्त्वम् । दुर्णयनयप्रमाणभेदेन ज्ञानस्य प्रकारत्रयम् । सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः । कृत्स्नकर्मक्षयो मोक्षः । कर्मणां क्षयस्तु बन्धहेत्वभावनिर्जराभ्याम् । सप्तसु तत्त्वेषु जीवाजीवावेव मुख्यौ पदार्थौ । तत्र भोक्ता जीवः । भोग्यश्चाजीवः । ज्ञानं द्विविधम् । प्रत्यक्षं परोक्षं च । आत्मसापेक्षज्ञानं प्रत्यक्षम् । आत्मेतरेन्द्रियमनःसापेक्षं ज्ञानं परोक्षम् । यज्ज्ञानोपलब्धौ स्वयमेवात्मा कारणं नान्यत्साहाय्यमपेक्ष्यते तदेव प्रत्यक्षम् । परोक्षज्ञानं द्विविधम्—मतिः श्रुतं च । एतद्द्वयमिन्द्रियमनःसहकारितामपेक्षते । अवधि—मनःपर्याय—केवलानीति प्रत्यक्षस्य त्रयो भेदा इत्युमास्वातिः । मतिश्चतुर्धा—अवग्रहेहावायधारणा इति । मतिर्द्विविधापि—तदिन्द्रियानिन्द्रियनिमित्तम् । मतिः स्मृतिः संज्ञा चिन्ताभिनिबोध इत्यनर्थान्तरम् । अन्येपि मतेर्भेदा जैनाकरे द्रष्टव्याः । द्विविधोवधिः । तत्र भवप्रत्ययो नारक- देवानाम् । यथोक्तनिमित्तः षड्विकल्पः शेषाणाम् । धर्माधर्माकाशपुद्गला इत्यजीवकायाः । नित्यसिद्धमुक्तबद्धभेदेन जीवास्त्रिविधाः । ईश्वरो नाभिप्रेतो जैनदर्शनस्य । स्यादस्ति स्यान्नास्ति स्यादस्ति च नास्ति च स्यादवक्तव्यं स्यादस्ति

चावक्तव्यं च स्यान्नास्ति चावक्तव्यं च स्यादस्ति च नास्ति चावक्तव्यं चेति सप्तभङ्गीन्यायः। अत्रोदाहरणम्—स्यादेकः स्यादनेकः स्यादेकश्चानेकश्च स्यादवक्तव्यः स्यादेकश्चावक्तव्यश्च स्यादनेकश्चावक्तव्यश्च स्यादेकश्चानेकश्चावक्तव्यश्चेति। एवं स्यान्नित्यः स्यादनित्यः स्यान्नित्यश्चानित्यश्च स्यादवक्तव्यः स्यान्नित्यश्चावक्तव्यश्च स्यादनित्यश्चावक्तव्यश्च स्यान्नित्यश्चानित्यश्चावक्तव्यश्चेति। तत्राह नैकस्मिन्नसम्भवादिति। एकस्मिन्नेव वस्तुनि विरुद्धयोर्धर्मयोर्यौगपद्येनासम्भवात्। यथैकस्मिञ्जले शीतत्वमुष्णत्वं च युगपन्न संभाव्यते, यथैकस्मिन्वस्तुनि ह्रस्वत्वं दीर्घत्वं च युगपन्न संभाव्यते तथैकस्मिन्नेव वस्तुनि नित्यत्वमनित्यत्वं च कथं संभवेताम्? एकस्यामेव गवि गोत्वं बलीवर्दत्वं चैकस्मिन्नेव काले कथंकारं सम्भवेत्? एकस्मिन्नेव जीवे समकालमेव धार्मिकत्वमधार्मिकत्वं तु सम्भवेतामेव। तस्मिन् धर्माधर्मयोः पूर्वत एव संग्रहस्य सर्वतन्त्रसिद्धत्वात्। सर्वं ब्रह्मेति प्रयोगोपि नानुपपन्नः। सर्ववस्तूनां ब्रह्मात्मकत्वात्। सर्वेषु वस्तुषु ब्रह्मणो व्यापकत्वाद्वा। "न हि ते शूर राधसोन्तं विन्दामि सत्रा। यः शक्रो मृक्षो अश्व्यो यो वा कीजो हिरण्ययः॥" (ऋ० ८।४६।११) "स ऊर्वस्य०" (ऋ० ८।६६।३) "पवित्रं ते विततम्" (ऋ० ९।८३।१) "कस्मिन्नङ्गे तपो अस्याः" (अथ० १०।७।१) "यो भूतं च भव्यं च" (अ० १०।८।१) "वशेदं सर्वमभवत्"

(अथ० १०।१०।२६) इत्यादयः संहितामन्त्रा अत्रानुसन्धेयाः। अनिवार्य वस्तुनि न चोदना। एकमेव साबू वस्त्रे प्रयुक्तं श्वैत्यं शौद्धयं च सममेव सम्पादयति। एकमेव जलं पीतं सच्छैत्यं तृट्छान्तिं च युगपदनुभावयति। नैवं शीतत्वोष्णत्वयोर्ह्रस्वत्वदीर्घत्वयोर्नित्यत्वानित्यत्वयोः कथमपि संभावनीया रीतिः। न च "तदेवाग्निस्तदादित्यः" (यजु० ३२।१) "स एव जातः स जनिष्यमाणः". (यजु० ३२।४) इति वेदप्रतिपादिता अनेके धर्मा एकस्मिन्नेव धर्मिणि ब्रह्मणि कथं समवयन्तीति वाच्यम्। सर्वशक्तिनो ब्रह्मणः सामर्थ्यानन्त्यात् सर्वव्यापकत्वात्सर्वेषां पदार्थानां तस्य व्याप्यत्वाच्च सर्वं वाङ्मनसयोर्दूरमपि तत्र संभवत्येव। "तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमाः। तदेव शुक्रं तद्ब्रह्म ता आपः स प्रजापतिः॥" (यजु० ३२।१) "स एव जातः स जनिष्यमाणः" (यजु० ३२।४) "येन द्यौरुग्रा पृथिवी च दृढा येन स्वः स्तभितं येन नाकः। यो अन्तरिक्षे रजसो विमानः" (यजु० ३२।६) "वेनस्तत्पश्यन्निहितं गुहा सद्यत्र विश्वं भवत्येकनीडम्। तस्मिन्निदं सं च वि चैति सर्वं स ओतः प्रोतश्च विभूः प्रजासु॥" (यजु० ३२।८) इति सर्वं सर्वशक्तिमति ब्रह्मणि तु सम्भवत्येव। अतो नार्हमार्हतमतम् ॥२।२।३१॥

एवं चात्माकार्त्स्न्यम् ॥२।२।३२॥

जीवो देहपरिमाण इत्यार्हती मर्यादा । हस्त्यादिशरीरं दीर्घम् । पिपीलिकादिशरीरं ह्रस्वम् । अन्यच्छरीरं मध्यमपरिमाणम् । जीवस्याल्पपरिमाणतया पिपीलिकादिशरीरे भवेन्नाम तस्य समावेशः । स एव जीवो मनुष्यादिशरीरे कुम्भिक्रमेलकशरीरे च कथं तत्तद्देहपरिमाणत्वं लभेतेत्यवश्यं दुर्निरूपम् । यदि पिपीलिकादिशरीरे पिपीलिकामात्रपरिमाणो मनुष्यादिशरीरे मनुष्यदेहपरिमाणो करीादिशरीरे करीादिशरीरपरिमाणो भवति स इत्युच्यते तदा तस्य विकारित्वं सर्वथा दुष्परिहार्यं स्यात् तथा नित्यत्वात्तस्य प्रच्युतिरेव स्यात् । अत्र प्रत्यवतिष्ठते "असंख्येयभागादिषु जीवानाम्" "प्रदेशसंहारविसर्गाभ्याम् प्रदीपवत् ।" इति तत्त्वार्थसूत्राभ्यां जीवस्वरूपं निरूपितं भवति । तत्र जैनमनीषिणाभिहितम्—वस्तुतस्तु जीवद्रव्यममूर्तमेव परन्तु कर्मसम्बन्धेन मूर्तिमत्तामाप्नोति । तथा च यदा यदा यावत्परिमाणकौदारिकादिशरीरसम्बन्धस्तस्य भवति तदा तदा तस्य परिमाणं तद्वद्भवतीति । जीवस्वभाव एवैष यत् सति निमित्ते प्रदीप इव संकोचविकासौ लभत इति । तत्तु तत्त्वविद्भ्यो न रोचते । न हि संकोचविकासौ नित्ये द्रव्येवस्थानमवाप्तुं शक्नुतः । यदि तत्रैवाग्रहो नित्यस्वरूपहानिरेव स्यात् । यद्यपि प्रागभावप्रतियोगित्वे सति ध्वंसाप्रतियोगित्वरूपनित्यत्वं तु संकोचविकासशालिन्यपि वस्तुनि संघटते तथाप्युपयन्नपयन्धर्मो विकरोति हि धर्मिणमिति न्यायेन जीवस्य सवि-

कारत्वं तु दुष्परिहरमेव। यद्यपि विशिष्टाद्वैतनयेप्यात्मनां धर्मभूतज्ञानस्य नित्यत्वमपि स्वीकृतं संकोचविकासशालित्वमपि, तथापि धर्मे तत्स्वीकृतं न तु धर्मिणीति। ननु धर्मो वा स्याद्धर्मी वा स्यात् यदि तस्य नित्यत्वमनित्यधर्माभ्यां संकोचविकासाभ्यां नापचीयते विशिष्टाद्वैतमते' तर्हि जैनमतेनैव किमपराद्धं येन तद्दोषादोषावगुण्ठितं क्रियते ? उच्यते। संकोचविकासशालित्वं नोपयदपयद्धर्मत्वम्। यावत्कार्यं ज्ञानस्य प्रसरणं हि संकोच शब्देन विकासशब्देन च विवक्षितम्। एवं च जीवस्य धर्मभूतज्ञानं संकोचविकासशालीत्येवाभिमतं न तूपायापायशालीत्यपि ॥२।२।३२॥

न च पर्यायादप्यविरोधो
विकारादिभ्यः ॥२।२।३३॥

अत्र पर्यायोनुक्रमो न तु समानप्रवृत्तिनिमित्तकत्वे सति विभिन्नानुपूर्वीकत्वमिति। अनुपयोगात्। जीवस्यावयवापगमोपगमाभ्यां क्रमेण जीवस्वरूपे पर्यायत्वं स्वीक्रियते चेत्तदपि न निर्बाधं न वा सयुक्तिकम्। जीवस्वरूपे स्वीक्रियमाणावयवगमोपगमौ जीवस्वरूपमेव समूलघोतं निहताम्। तस्य कस्मिंश्चिद्धर्मेपगमोपगमयोः स्वीकारश्चेन्न तथापि समीहितार्थसिद्धिः। जीवस्य विकारित्वप्रसङ्गात्। न चापगमोपगमयोर्जीवस्वरूपे स्वीकारेपि तु तत्तात्त्विकत्वाभावान्न काचिद्धानिरितिवाच्यम्। धर्ममपहाय धर्मिस्थित्यनवकाशात्। धर्मधर्मिणोर्नित्यसम्बन्धस्वीकाराच्च ॥२।२।३३॥

अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषः ॥२।२।३४॥

अन्त्यस्यान्त्यशरीरपरिमाणस्य मोक्षावस्थापरिमाणस्येत्यर्थः । अवस्थितेरविकृतरूपेणावस्थितेः । मोक्षावस्थानन्तरं देहमात्रपरिग्रहस्यासम्भवात् तत्स्थितिस्थितस्यावस्थाविशेषस्य तत्परिमाणस्य च नित्यत्वात्, तदानीं यत्किञ्चिद्देहस्याभावाच्च देहपरिमाणस्यासिद्धत्वेन यत्किञ्चित्स्वाभाविकं परिमाणं स्यात्तदेवात्मपरिमाणं निश्चेतव्यम् । आत्मनो देहपरिमाणत्वसिद्धान्तस्तु ध्वान्तसंवलित एवेति ॥२।२।३४॥

॥ इत्येकस्मिन्नसम्भवाधिकरणम्—६ ॥

—०—

(अथ पत्युरसमञ्जसाधिकरणम्—७)

पत्युरसामञ्जस्यात् ॥२।२।३५॥

कपिलकणादमतयोरसामञ्जस्यनिरूपणानन्तरं सौगतार्हतमतयोरवैदिकत्वज्ञापनान्तरं चेदानीं "पशुपतिमतमपि श्रुत्यश्रुतं ततश्च तद्विरुद्धमिति नादरणीयमिति बोधयितुं प्रवृत्तमिदमधिकरणम् । अत्र सूत्रे श्रुतपतिशब्देन पशुपतिग्रहणं बोद्धव्यमिति" सर्वे वेदान्तसूत्रभाष्यकाराः । भामा सत्यभामेतिवत्पशुशब्दलोपेनात्र पतिशब्दप्रयोगो द्रष्टव्य इतिश्रीभाष्यकाराणामभ्युपायः । वस्तुतस्तु नात्र पतिशब्दः पशुपतिमुपस्थापयति । पत्युरितिप्रयोगात् । पशुपतिरिति समस्तं

पदम् । तस्यैकदेशः पशुरिति, एकदेशश्च पतिरिति । समुदायः सार्थकः । एकदेशो ह्यनर्थकः । न ह्यनर्थके शास्त्रप्रवृत्तिः । एवं चात्रानर्थके पतिशब्दे कस्यापि शास्त्रस्य प्रवृत्तिरेव न स्यात् । किं च नायं पूर्वपदलोपः शास्त्रनियन्त्रितो लोकनियन्त्रित एव । अत एव "अथवा पूर्वपदलोपोत्र द्रष्टव्यः –अत्यन्तसिद्धः सिद्ध इति । तद्यथा देवदत्तो दत्तः, सत्यभामा भामेति ।" इतिभाष्यवचनं विवृण्वतः कैयटस्य 'वर्णाना-मि'ति प्रतीकमादायोद्योतकारेणोक्तम्–क्वचित्पूर्वपदस्यैव क्वचि-दुत्तरपदस्यैव क्वचिदुभयोरिति लोकव्यवहारेण निर्णयमिति। "अस्यार्थस्य लोकसिद्धत्वेन कृष्णसर्पादावनतिप्रसङ्गः । अत एव भीमसेनादौ सेन इत्यादेर्न तत्त्वम्" इति तत्रैव च्छाया । अतो नात्र पतिशब्देन पशुपत्याख्याचार्यस्य ग्रहणम् । सूत्रार्थ-स्तु–पत्युः परमेश्वरस्यैव सर्वत्र सृष्टिविसृष्ट्यादौ कर्तृत्वस्वी-कारः कर्तव्यः । कुतः ? असामञ्जस्यात् । वैदिकेश्वरानङ्गीकारे वेदवाक्यानामसामञ्जस्यमेव स्यात् । कीदृशमसामञ्जस्यम् ? ईदृशम्–हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ।" (ऋ० १०।१२१।१) "पतिर्ह्यध्वराणामग्ने दूतो विशामसि । उषर्बुध आ वह सोमपीतये देवाँ अद्य स्वर्दृशः॥" (ऋ० १।४४।९) "पतिर्भव वृत्रहन् सूनृतानां गिरां विश्वायुर्वृषभो वयो धाः ॥" (ऋ० ३।३१।१८) । ऋणोतु न ऊर्जां पतिगिरः" (ऋ० ५।४१।१२) । .... सोमं स्वस्ति भुवनस्य यस्पतिः" (ऋ० ५।५१।१२) । "पतिर्बभूथा

समो जनानामेको विश्वस्य भुवनस्य राजा" (ऋ०६।३६।४)। "स एक इत् तमु ष्टुहि कृष्टीनां विचर्षणिः। पतिर्जज्ञे वृषक्रतुः" (ऋ०६।४५।१६) इत्यादिषु सर्वत्र सर्वसृष्टीनां जीवानां च तस्यैव परमेश्वरस्यैव पतित्वस्य श्रवणात्। परमेश्वरास्वीकारे वेदवाक्यानामसामञ्जस्यं प्रसज्येत ॥ २।२।३५॥

अधिष्ठानानुपपत्तेश्च ॥२।२।३६॥

यदि परमेश्वरो नाभिमतः स्यादधिष्ठानानुपपत्तिश्चापि प्राप्नोति। कथम्? इत्थम्—"किं स्विदासीदधिष्ठानमारम्भणं कतमत्स्वित्कथासीत्। यतो भूमिं जनयन् विश्वकर्मा वि द्यामौर्णोन्महिमा विश्वचक्षाः" (ऋ० १०।८१।२)। अस्मिन्मन्त्रे जगदधिष्ठानविषयकं प्रश्नमुत्थाप्य तत्रैवोत्तरम् "विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात्। सं बाहुभ्यां धमति सं पतत्रैर्द्यावापृथिवी जनयन्देव एकः॥" (ऋ० १०।८१।३) इति। यदीश्वरानङ्गीकारः, जगतोधिष्ठानानुपपत्तिः सुतरां पीडयेदनीश्वरवादिनमिति॥ २।२।३६॥

करणवच्चेन्न भोगादिभ्यः ॥ २।२।३७ ॥

यदि जगत्कर्तृ ब्रह्मैवेत्यभिमतं तर्हि तेन करणवता भाव्यम्। लोके करणवत एव कर्तृत्वदर्शनात्। ननु स्वीक्रियत एव ब्रह्मकरणम्, का क्षतिः? अस्त्येव क्षतिः। करणवत्त्वाद-

नित्यत्वं प्रसज्येतासामर्थ्यं च तस्य प्रतीयेत। नैतत्। "तदिन्नु ते करणं दस्म विप्राहिं यद् घ्नन्नोजो अत्र गमिमीथाः। शुष्णस्य चित्परि माया अगृभ्णाः प्रपित्वं यन्नपदस्यूँरसेधः॥ (ऋ० ५।३१।७)। अत्र वेदे ब्रह्मणः करणस्य श्रवणात् करणत्वस्वीकारे न दोषः। "प्र तत्ते अद्या करणं कृतं भूत्कुत्सं यदभ्युमतिथीव यस्मै। पुरू सहस्रा नि शिशा अभि क्षायुत् तूर्वयाणं धृषता निनेथ॥ (ऋ० ६।१८।१३)। यदि ब्रह्मणः करणं स्वीक्रियेत "सत्रा त्वं पुरुष्टुतँ एको वृत्राणि तोशसे। नान्य इन्द्रात्करणं भूय इन्वति।" (ऋ० ८।१५।११)। इति विरोधः प्रसज्येत। न विरोधः प्रसज्येत। अनेनैव वाक्येन प्रतीयते ब्रह्मणो नान्यत्करणं, तदेव कर्तृ तदेव च करणमिति न विरोधः। स्वनिष्ठव्यापाराव्यवधानेन फलनिष्पादकं हि करणम्। ब्रह्मनिष्ठो यो जगद्व्यापारस्तस्याव्यवधानेन फलनिष्पादिका ब्रह्मेच्छैव भवति। न हि ब्रह्मेच्छा ब्रह्म व्यभिचरति। ब्रह्मणो यत्किञ्चित्पदार्थस्य ब्रह्मानतिरिक्तत्वात्। ब्रह्मण इच्छापि ब्रह्मैव। अत एव "तेजोसि तेजो मयि धेहि, मन्युरसि मन्युं मयि धेहि, ओजोस्योजो मयि धेहीत्यादि याजुषं वाक्यं संगच्छते। तस्य सर्वं तदेवेति सिद्धान्तः। "साधकतमं करणम्" इति पाणिनिः। क्रियासिद्धौ प्रकृष्टोपकारकं हि करणमितितदाशयः। अतो ब्रह्मेच्छा हि ब्रह्मकरणम्। सा चेच्छा ब्रह्मस्वरूपैवेति प्रतिपादितमेवेति न किञ्चिदनिष्टमाशङ्कनीयम्। सूत्रार्थस्तु—यदि ब्रह्म करणवत्

अनित्यत्वापत्तिः पारतन्त्र्यं च प्रसज्येत । न । भोगादिभ्यो हि करणम् । भोगादिभ्यो यदि तत्करणं स्यात्तत्रदुक्तो दोषः प्रसज्येत । न हि तत्र तस्य प्रसक्तिः । ॥ २।२।३७ ॥

अन्तवत्त्वमसर्वज्ञता वा ॥२।२।३८॥

पूर्वसूत्रान्नेति पदमुपस्थितम् । अन्तवत्त्वमसर्वज्ञत्वं चापि न प्रसज्येत । वेति चार्थे । अयं भावः । ब्रह्मैव कर्तृ ब्रह्मैव करणम् । अतस्तस्यान्तवत्त्वमपि न, न वासर्वज्ञत्वमपि । यद्यन्यत्करणं स्यादवश्यं तेनान्तवत्तासर्वज्ञत्वेन चापि भाव्यम् । न हि ब्रह्मणोन्यत् किञ्चित्करणम् । न हि ब्रह्म केवलं जगत्करणं जगदाधारोपि तदेव । तदेवोक्तमस्यामृचि–"यत्राधि सूर उदितो विभाति कस्मै देवाय हविषा विधेम" (ऋ० १०। १२१।६) । अपादानमपि ब्रह्मैव । तथा हि–"प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव" (ऋ० १०। १२१।१०) । हे प्रजापते ब्रह्मन् त्वत् त्वत्त एतानि जातानि विश्वानि न त्वत् त्वत्तोन्यो भिन्नानीतियावत् । न हि जन्यं जनकादन्यद्भवतीतिवेदसिद्धान्तः । औपनिषदा अपि सततमत्र सम्मताः। अत एव ब्रह्मण्यन्तवत्त्वासर्वज्ञत्वरूपौ दोषौ न प्रसज्येते ॥ २।२।३८ ॥

(इति पत्युरसमञ्जसाधिकरणम्–७)

–०–

(अथोत्पत्त्यसम्भवाधिकरणम्–८)

उत्पत्त्यसम्भवात् ॥ २।२।३९ ॥

यत्पूर्वस्मिन्नधिकरणे ब्रह्मणो जगदुत्पत्तिः समर्थिता तन्न समीचीनम् । कुतः ? उत्पत्त्यसम्भवात् । यावत्कर्तृकरणापादानाधिकरणादीनि पृथक्पृथङ् न स्युस्तावत्सृष्टेरुत्पत्तेरसम्भवः । लोके तथैव दर्शनात् । वेदेपि "किं स्विदासीदधिष्ठानमारम्भणं कतमत्स्वित्कथासीत् ।" (ऋ० १०।८१।२) इति मन्त्रेणाधिष्ठानापादानादीन्यधिकृत्य प्रश्नोत्थानम् । न ह्येकमेव सर्वकारकत्वसंवाहकं स्यात् ॥ २।२।३९ ॥

न च कर्तुः करणम् ॥ २।२।४० ॥

कर्तुः परमेश्वराख्यस्य ब्रह्मणो जगत्कर्तृणः करणं साधनं नापेक्षितम् । सर्वशक्तिमता हि ब्रह्मणा कामं स्वकामरूपकरणेन सर्वं निष्पाद्यते । शक्तिहीनं हि करणपराधीनतामाराध्नोति । सर्वशक्ति ब्रह्म स्वसमीहितं सम्पादयितुं न परमुखापेक्षि भवति । अत्र करणशब्देनाधिकरणादीनामपि संग्रहो बोद्धव्यः ॥ २।२।४० ॥

विज्ञानादिभावे वा तदप्रतिषेधः ॥ २।२।४१ ॥

वा अथवा। विज्ञानादिभावे विज्ञानादिसत्त्वे तदप्रतिषेधः साधनाधिष्ठानादीनामप्रतिषेधः। ब्रह्मणो विज्ञानमेव सर्वकारकसम्पाद्यं सम्पादयति। तथा हि–" श्रद्धा पुंश्चली मित्रो मागधो विज्ञानं वासोहरुष्णीषं रात्री केशा हरितौ प्रवर्तौ कल्मलिर्मणिः (अथ० १५।२।५)। " विद्युत्पुंश्चली स्तनयित्नुर्मागधो विज्ञानं वासोहरुष्णीषम्...." (अथ० १५।३।२५) " इरा पुंश्चली हसो मागधो विज्ञानं वासः।" (अथ० १५।३।१९) " श्रुतं च विश्रुतं च परिष्कन्दौ...." (अथ० १५।३।२६)। एष्वाथर्वणमन्त्रेषु सर्वत्र विज्ञानं वास इत्युपदिष्टं भवति। वासःशब्दः " वस निवासे " इत्यस्माद्धातोः " वस आच्छादने " इत्यस्माद्वा निष्पन्ने विज्ञानस्वरूपं प्रकाशयति। तथा हि सर्वस्य निवासप्रदानात्सर्वेषु पदार्थेषु व्यापकत्वाच्च ब्रह्मैव विज्ञानशब्दवाच्यं भवति। सूत्र आदिशब्देन श्रद्धायाः पुंश्चलीत्वम् अह्न उष्णीषत्वमित्यादि ग्राह्यम्। ब्रह्मणो विज्ञानमेव करणाधिकरणादीनां कृत्यं सम्पादयति ॥ २।२।४१ ॥

विप्रतिषेधाच्च ॥ २।२।४२ ॥

चकारोऽप्यर्थकः। विप्रतिषेधादपि ब्रह्मणः करणादीनामनपेक्षा। विप्रतिषेधो विरोधः। यजुर्वेद उक्तम्–" स पर्यगाच्छुक्रमकायमव्रणमि " त्यादि। अकायग्रहणेन सर्वेषामिन्द्रियाणां लौकिकसाधनानां च निषेधः क्रियते। अतो

विज्ञानादिकमेव ब्रह्मणः करणत्वेन ग्राह्यम् । नान्यत्करणं तस्य सर्वशक्तिमत इति ॥ २।२।४२ ॥

(इत्युत्पत्त्यसम्भवाधिकरणम्—८)

इति सर्वतन्त्रस्वतन्त्रैः काशीपण्डितसभया पंडितराजे-
त्युपाधिविभूषितैः कवितार्किकैः सर्ववेदव्याख्यातृभिः
स्वामिश्रीभगवदाचार्यमहाराजैः
प्रणीते वेदान्तदर्शनापरपर्यायब्रह्मदर्शनवैदिकभाष्ये
द्वितीयाध्याये द्वितीयः पादः

अथ तृतीयः पादः

(वियदधिकरणम्—१)

न वियदश्रुतेः ॥ २।३।१ ॥

गता विप्रतिपन्नप्रतिवादिकक्षानुकक्षं कर्कशतर्कसंग्रहस्य । इदानीं स्वमतं प्रपञ्चयितुं विशोधयितुं च भगवान्सूत्रकारः प्रयत्नवान् । वियदुत्पत्तिः प्रायेण बहुभिरेव दार्शनिकैः स्वीक्रियते । तज्जानताजानता वा पूर्वपक्षेणोच्यते वियन्नोत्पद्यत इति । कुतः? अश्रुतेः । श्रुतौ तदुत्पत्त्यदर्शनात् । वियदाकाशम् । निरवयवो ह्याकाशः । अवयवसमुदायः प्रकृतिकार्यः । नाकाशः साव-

यत्रोतो न स प्रकृतिकार्यः। अत एव याजुषैरुच्यते खं ब्रह्मेति। खमाकाशः। आकाशवद्व्यापकं ब्रह्म। न हि सावयवो व्यापकत्वं व्याप्नोति। अपरमपि व्याख्यानमस्य सूत्रस्य। तथा हि, वियदिति तत्त्वं नास्ति। कुतः? अश्रुतेः। श्रुतौ वेदे कुत्रापि वियतः श्रुतेरभावान्नास्त्येव सेति ॥ २।३।१ ॥

सिद्धान्तयति —

अस्ति तु ॥ २।३।२ ॥

निरवयवत्वादप्याकाशस्योत्पत्तिरिष्यते। उत्पत्त्यभावो निरवयत्वेन न व्याप्तः। पञ्चैव महाभूतानीतिस्वीकार आकाशो हि पञ्चमं भूततत्त्वम्। भूतानां भौतिकानां चोत्पत्तिर्वेदचोदिता। आकाशस्याप्युत्पत्तिर्वेदे श्रूयत एव। तथा हि—" दिवं च पृथिवीं चान्तरिक्षमथो स्वः" (ऋ० ८।१९।३)। अत्रान्तरिक्षं वियदेव। वैदिकनिघण्टौ वियदन्तरिक्षयोराकाशनाम्नि पाठात्। नन्वन्तराकाशं ह्यन्तरिक्षमित्युच्यते। वियदिति तु नान्तराकाशमेव। सर्वव्यापिका हि सा। विगतं यमनमुपरमणमस्मादिति विग्रहः। अन्तरिक्षं ह्यन्तरेव दृश्यते। वियत्तु सर्वगतं तत्त्वम्। अतो न वियदित्युक्तिर्न साफल्यश्नुते। अत एवाह वियदप्यस्त्येवेति। तथा हि वेदेपि, "अतृप्णुवन्तं वियतमबुध्यमानं सुषुपाणमिन्द्र। सप्त प्रति प्रवत आशयानमहिं वज्रेण वि रिणा अपर्वन्।" (ऋ०४।१९।३)। अतृप्णुवन्तमतृप्यन्तीमिति सर्वव्यापकत्वात्तृप्तेरभावः प्रतिपादितः। अबुध्यमानमबोध-

नीयां दुर्बोध्याम् । अतिसूक्ष्मत्वादितिभावः । सुषुपाणं सुषुप्ता-
मिव । निर्विकारत्वान्निष्क्रियत्वाच्च वियति सुषुप्तिकल्पना ।
अत्र वियच्छ्रुतिरस्त्येवेति । अथवा वियतोप्युत्पत्तिरस्त्येव ।
कथमवगम्यते ? श्रुतेरेव । का सा श्रुतिः ?
"दिवं च पृथिवीं चान्तरिक्षमथो स्वः" (ऋ० ८।१९१।३)।
तपसोऽध्यजायतेति सर्वत्रानुसृष्टिः । अन्तरिक्षं वियदेव ।
तथा हि निघण्टौ वियदन्तरिक्षशब्दावाकाशनाम्नि पठितौ ।
न च निरवयवस्याकाशस्य न संभाव्यत उत्पत्तिरिति
वाच्यम् । नाकाशो निरवयवः । नभ एव सः । न भातीति
नभः । प्रत्यक्षकलनाभावादेव निरवयवत्वोक्तिः काचित्की ।
न हि कोपि भौतिकः पदार्थो निरवयत्वं भजते । वायुः
सूक्ष्मः सन् यथा न स्वावयवमाविर्भावयति तथा ततोपि
सूक्ष्मतर आकाशो न स्वावयवं प्रकाशयति । शब्दगुणको
ह्याकाशः । न हि निराकारः कस्यापि गुणस्याश्रयो भवति ।
वायुरपि न निराकार इत्युक्तमेव । एवं च सर्वमेव जन्यं
साकारमेव भवति । तदाकारस्य सौक्ष्म्यादतिसौक्ष्म्याच्च
न भवति दर्शनं वा स्पर्शनं वा प्रत्यक्षं वेत्यन्यदेतत् ॥२।३।२॥

पुनरुत्सहते पूर्वपक्षयितुम्--

गौण्यसम्भवाच्छब्दाच्च ॥२।३।३॥

यद्याकाशस्योत्पत्तिः श्रूयते गौणी हि सोत्पत्तिः ।
कुतः ? असम्भवात् । न हि निराकारस्योत्पत्तिः संभाव्यते ।

निराकारो ह्याकाशः । कथङ्कारं स उत्पत्तिभाग्भवेत् ? कथंकारं नोत्पत्तिभाग्भवेत् ? निराकारत्वात् । निराकारो नोत्पद्यत इति कुतस्त्वया श्रुतम् । न श्रुतमनुभूतं तु । क्व ? आत्मा निरवयवत्वादेव नोत्पद्यते । परमात्मापि निरवयत्वादेव नोत्पद्यते । नैतद्वक्तुं शक्यम् । निरवयत्वादात्मा नोत्पद्यत इति न । नित्यत्वाद्धि स नोत्पद्यते । नित्यत्वं च तस्य बहुशः श्रुतयः प्रतिपादयन्ति । तथा हि "नित्यास ईं प्रेतारो अरक्षन्" (ऋ०१।१४८।५) "अभ्यानश्म सुवितस्य शूषं न वेदसो अमृतानामभूम" (ऋ० १०।३१।३) "अहमस्मि सपत्नहेन्द्र इवारिष्टो अक्षतः । अधा सपत्ना मे पदोरिमे सर्वे अभिष्ठिताः ।" (ऋ० १०।१६६।२) न च "य आत्मदा बलदा" (ऋ० १०।१२१।२) इति मन्त्रे श्रुतेनात्मदेतिपदेनात्मानं ददातीतिव्युत्पत्तिकेनात्मनो न नित्यत्वं सिध्यतीतिवाच्यम् । आत्मशब्दस्य बह्वर्थकत्वादत्र शक्तिरिति तदर्थः । न चैवं शक्तिबलयोः पर्यायत्वात्पौनरुक्त्यं स्यादितिवाच्यम् । शक्तिबलयोर्भिन्नार्थकत्वात् । बलं हि देहधर्मः । शक्तिस्त्वात्मधर्मभूता । शक्तिः शक्तिमता सहैवोत्पद्यते । बलं तु पाश्चात्त्यो धर्मः । उत्पद्येत न वोत्पद्येत । लोकेपि दाहकत्वशक्तिरनलस्यात्मभूतो धर्मः । तस्य बलं त्विन्धनादिसहयोगसाध्यम् । शब्दाच्चापि प्रतीयते न वियदुत्पद्यत इति । कोसौ शब्दः ? वियदित्येव । वियच्छति न विरमतीति वियत् ।

सोत्पत्तिकस्यैव विरामः, नानुत्पत्तिमतः। अतो न वियदुत्पद्यत इति। वियच्छब्दस्य व्युत्पत्तिमाश्रित्य तस्या उत्पत्तिर्निषिध्यते। अन्येपि सन्ति वियच्छब्दपर्याया अन्तरिक्षम् आपः पृथिवी भूः सगरः समुद्र इत्याद्याः। तत्र न शक्यते तदुत्पत्ति निषेद्धुम्। यथा अन्तरिक्षमिति। अत्र निरुक्तम्—अन्तरिक्षं कस्मात्? अन्तरा क्षान्तं भवति, अन्तरेमे इति वा शरीरेष्वन्तरक्षयमिति वेति (निरु० २।१०)। पृथिवी प्रथत इति। भूर्भवतीति। सगरः सह गिरन्त्यादित्यरश्मयो भौमरसं यत्रेति। एवमन्यत्। ननु स्वयम्भूरित्यप्यन्तरिक्षस्यैव नाम। अत्र स्वयम्भवतीत्युत्पत्तिर्निषिध्यते। नोत्पत्तिर्निषिध्यत उत्पादनं हि निषिध्यते। एवं चाकाशो नोत्पत्तिमानिति न शक्यते व्यवस्थापयितुम् ॥२।३।३॥

अन्यदपि—

स्याच्चैकस्य ब्रह्मशब्दवत् ॥२।३।४॥

बृंहणाद्ब्रह्मेत्येव ब्रह्मशब्दव्युत्पत्तिः। यथा ब्रह्मशब्दस्य प्रवृत्तिनिमित्तं बृंहणमेव। सर्वं बृंहयति तस्मात्तद्ब्रह्मेत्युच्यते। एवमेकस्यान्यस्येति यावत्। अन्तरिक्षम्वादिशब्दसमुदायस्यापि स्यात्। किं स्यात्? अन्यद्धि शब्दानां व्युत्पत्तिनिमित्तम्, अन्यद्धि प्रवृत्तिनिमित्तम्। बृंहयतीति क्रियाकारित्वं ब्रह्मणि

प्रतीयते। न हि सा वास्तविकी प्रतीतिः। सर्वं हि क्रियावदनित्यं दृष्टचरम्। यदि वास्तविकी क्रिया ब्रह्मणि स्यात्तस्यानित्यत्वं दुर्वारमेव स्यात्। एवं वियत्पर्यायशब्देभ्यो यदि वियदुत्पत्तिः साधिता स्यादौपचारिकी हि सोत्पत्तिः स्यान्न वास्तविकीति ॥२।३।४॥

अत्रोत्तरम्—

प्रतिज्ञाहानिरव्यतिरेकात् ।२।३।५॥

न हि वियदुत्पत्तेर्गौणीत्वकल्पनं युक्तम्। कुतः? प्रतिज्ञाहानिः स्यात्। का सा प्रतिज्ञा? "दिवं च पृथिवीं चान्तरिक्षमथो स्वः" इति। नेयं प्रतिज्ञा। प्रतिज्ञा तु "साध्यनिर्देशः प्रतिज्ञा" (न्याय० १।१।३३) "प्रज्ञापनीयेन धर्मेण धर्मिणो विशिष्टस्य परिग्रहवचनं प्रतिज्ञेति तत्रैव वात्स्यायनः। सत्यम्, तथापि न दिवं च पृथिवीं चेत्यादिकं वचनम् प्रतिज्ञेति न। अङ्गीकारोपि प्रतिज्ञेत्युच्यते। दिवं च पृथिवीं चेत्यादिः श्रुतिरङ्गीकारस्वरूपैवेति। यदि नेयं प्रतिज्ञेत्यत्रैवाग्रहश्चेद् दिवं च पृथिवीं चेत्यादिकं श्रौतं वचनं कीदृशं भवन्मते? अतिक्रान्तान्वाख्यानमेतत्। भवतु नाम, अतिक्रान्तान्वाख्यानमपि प्रतिज्ञां स्मारयत्येव। प्रतिज्ञापूर्विका हि कृतिः प्रवर्तते। यद्यन्तरिक्षकृतौ पूर्वं प्रावर्तिष्ट ब्रह्म तत्सर्जने भवेदेव तत्प्रतिज्ञावत्। एवं चोत्पत्तौ गौणीत्वकल्पने ब्रह्मप्रतिज्ञाहानिः स्यादेव। कस्मात्? अव्यतिरेकात्—'अन्य-

दुत्पत्तिमत्पदार्थाव्यतिरेकात् । यथान्याज्ञागतिकान्पदार्थान् ब्रह्म प्रतिज्ञापूर्वकमुत्पादयति वियतमपि तथैव ॥२।३।५॥

शब्देभ्यः ॥२।३।६॥

वैदिकशब्देभ्योपि सिद्धां वियदाद्युत्पत्तिं न शक्नोति निवारयितुं कोपि । के ते वैदिकाः शब्दाः? "दिवं च पृथिवीं चान्तरिक्षमथो स्वः" इति । नन्वेक एवासौ वैदिकशब्दः । आचार्यास्तु शब्देभ्य इति बहुवचनं पठन्ति । बाढं पठन्ति । सन्त्येवान्येपि शब्दाः । त एव तु पृच्छ्यन्ते । शृणु । "यत्पर्जन्यः कृणुते वृष्यं नभः" (ऋ० ५।८३।३)। अत्र पर्जन्यो ब्रह्मैव । तृपेरन्तर्णीतणिजन्तात्क्विपि तर्पयतीति तृप् । जनहितो जन्यः । हितार्थे यत् । तृप् चासौ जन्यश्चेति विग्रहे तृप्शब्दस्य पर्भावे पर्जन्य इति । अथवा परः प्रकृष्टो जेता जनयिता वेति पर्जन्यः । स तु परमेश्वर एव—ब्रह्मैवेति । तथा हि—"यस्य व्रते पृथिवी नंनमीति यस्य व्रते शफवज्जर्भुरीति । यस्य व्रत ओषधीर्विश्वरूपाः स नः पर्जन्य महि शर्म यच्छ ॥" (ऋ० ५।८३।५)। वि वृक्षान्हन्त्युत हन्ति रक्षसो विश्वं बिभाय भुवनं महावधात् । उतानागा ईषते वृष्ण्यावतो यत्पर्जन्यः स्तनयन्हन्ति दुष्कृतः ॥" (ऋ० ५।८३।२)। "प्र वाता वान्ति पतयन्ति विद्युत उदोषधीर्जिहते पिन्वते स्वः । इरा विश्वस्मै भुवनाय जायते यत्पर्जन्यः पृथिवीं रेतसावति ॥" (ऋ० ५।८३।४)

इत्यादयः । अत्र सर्वत्र पर्जन्यशब्दो ब्रह्मण एव वाचकः । एतेन शब्दराशिना वियदाद्युत्पत्तिः स्पष्टैवेति ॥२।३।६॥

यावद्विकारं तु विभागो लोकवत् ॥२।३।७॥

तुरित्येवमर्थे । एवं यावद्विकारं लोकवद्विभाग इत्यन्वयः । सूत्रार्थस्तु लोके यथा यावद्विकारं विभागो दृश्यते-अयं घटोयं पट इदं कटकमिदं कुण्डलमित्येवंरूपस्तथेयं पृथिवीदं जलमिदं तेजोयं वायुरयमाकाश इति विभागो दृश्यते । विकाराणामेवायं विभागः। यद्विभक्तं तज्जन्यम् । वियदपि विभक्ता तस्मात्सापि जन्यैव । वियतो विभक्तिश्च स्पष्टैवेदं जलमियं च वियदिति-रूपेण । न चायमात्मायं च परमात्मेयं च प्रकृतिरित्येवमपि विभागस्य दर्शनात्तेष्वपि जन्यत्वं सिद्ध्येदितिवाच्यम् । तत्र विकाराभावात् । यावद्विकारं विभाग इत्येवोच्यते न तु केवलं विभाग इति । किंच सर्वेषां जडाजडानां ब्रह्म-शरीरत्वाच्छरीरशरीरिणोश्चैक्यात्तत्र विभागानुपपत्तेश्च ॥ २।३।७॥

एतेन मातरिश्वा व्याख्यातः ॥२।३।८॥

यथा वियच्छब्दः कलहस्थानं तथैव मातरिश्वेत्यपि । अतः कलहविलयकरणाय प्रवर्तमानो भगवान्सूत्रकारः कथयति-एतेन वियच्छब्दार्थनिर्णयपूर्वकवियदुत्पत्तिनिरूपणमार्गेण मातरिश्वा व्याख्यातः । मातरिश्वच्छब्दोपि व्याख्येय इत्यर्थः । अयमाशयः-यथा वियच्छब्दश्रवणेन तदर्थमाक्र-

विचारेण च वियतो नोत्पत्तिः सिध्यति तदर्थमन्थनेन च सिध्यति तथैव मातरिश्वशब्दश्रवणमात्रेण तस्योत्पत्तिर्न निर्धारिता भवति तन्निगूढार्थविचारेण च तस्याप्युत्पत्तिः सिध्यत्येव। तदर्थविचारक्रमस्त्वेषः—मातर्यन्तरिक्षे श्वयति वर्धत इति मातरिश्वा। यद्यप्यनेनोत्पत्तिर्न विज्ञायते परन्तु जनिपूर्विका हि वृद्धिरितिनियममनश्रित्य विचारे कृते मातरिश्वनोपि सिध्यत्येवोत्पत्तिरिति ॥२।३।८॥

असम्भवस्तु सतोनुपपत्तेः ॥ २।३।९ ॥

तुशब्दोत्रावधारणार्थः। सम्भव उत्पत्तिः। असम्भवोनुत्पत्तिः। सच्छब्दार्थोत्र ब्रह्म। एवं च सतः कस्याप्यकार्यभूतस्य सर्वविकाररहितस्य परब्रह्मणोनुपपत्तिः। न हि ब्रह्मण उत्पत्तिर्भवतीत्यभिधीयते। कुतः? अनुपपत्तेः। यदि ब्रह्मणोपि स्यादुत्पत्तिस्तत्र कारणगवेषणा स्यात्। ब्रह्म सर्वस्य जगतः कारणम्। न हि कारणस्य कारणं भवति। यदि कारणस्यापि कारणान्वेषणा स्यात्तस्याप्यन्वेषणा तस्याप्यन्वेषणानिवारणीया स्यात्। ततः कारणपरम्परा न विच्छिद्येत। एवं च निर्णयाभावान्निर्णिनीषितं ब्रह्मानिर्णीतमेव स्यात्। तथा चानुपपत्तिः। अनुपपत्तिभिया ब्रह्मण्येव विरामः कर्तव्यो नाग्रे गन्तव्यमिति। एतदन्तिमसूत्रद्वयप्रतिपादितविषयः प्रासङ्गिक एवेति नाधिकरणव्याख्येयार्थं स्पृशति। ग्रामं गच्छँस्तृणं स्पृशतीतिवन्मा-

तिरश्वनः सतश्च स्पर्शः। सद् ब्रह्म। तथा हि–इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान्। एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः॥ (ऋ० १।१६४।४६)। समानमन्त्रयपठितत्वात्सतो मातरिश्वनश्चार्थसंशुद्धिः॥२।३।९॥

(इति वियदधिकरणम्–१)

–०–

(अथ तेजोधिकरणम्–२)

तेजोतस्तथा ह्याह ॥ २।३।१० ॥

सर्वं जगद्ब्रह्मकार्यमिति वेदान्तसिद्धान्तः। तदेव स्पष्टयितुमिदमधिकरणम्। सूत्रार्थस्तु–तेजोतो ब्रह्मण एवोपपद्यते। तथा हि आह-वेदेष्वपि तथैवोपदिष्टम्। तथा हि–"अयं ते योनिर्ऋत्वियो यतो जातो अरोचथाः। तं जानन्नग्न आ सीदा था नो वर्धया गिरः॥ (ऋ० ३।२९।१०)। "जातो अग्नी रोचते चेकितानः" (ऋ० ३।२९।७) "तनूनपादुच्यते आसरो गर्भः" (ऋ० ३।२९।११) इत्यादि ॥ २।३।१० ॥

आपः ॥ २।३।११ ॥

आपोपि ब्रह्मण एवोत्पद्यन्ते। "ऋतं च सत्यं चाभीद्धात्तपसोऽध्यजायत। ततो रात्र्यजायत। ततः समुद्रो अर्णवः" (ऋ० १०।१९०।१) इतिवेदवचनादिति भावः। समुद्रः आपः ॥ २।३।११ ॥

पृथिवी ॥ २।३।१२ ॥

"पद्भ्यां भूमिः" (ऋ० १०।९०।१४) इति वाक्याद्ब्रह्मण एवोत्पत्तिः पृथिव्या अपीति । "येन द्यौरुग्रा पृथिवी" (ऋ० १०।१२१।५) इत्याद्यपि वेद्यम् ॥ २।३।१२ ॥

अधिकाररूपशब्दान्तरेभ्यः ॥ २।३।१३ ॥

अधिकारो योग्यता । अधिकाराद्रूपाच्छब्दान्तराच्च प्रतिपादयामस्तेजोप्पृथिवीनां परं ब्रह्मैवोत्पादकमिति । न हि जीवेषु तादृशोधिकारो दृश्यते येन तेजःप्रभृतीनां सृष्टिर्जीवैः सम्पादिता भवेत् । रूपादपि । तेजसो भासुरतापां श्वैत्यं पृथिव्याश्च कृष्णत्वं न जीवैः सम्पादितानि स्युः । शब्दान्तराच्च । सन्त्येव बहवो वैदिकाः शब्दाः समर्थका एतेषां तत्त्वानामुत्पादकत्वं ब्रह्मण एवेति । तथा हि— "सनो बन्धर्जनिता स विधाता" इति ॥२।३।१३॥

तदभिध्यानादेव तु तल्लिङ्गात्सः ॥२।३।१४॥

तस्य ब्रह्मणोभिध्यानं तदभिध्यानं तस्मात् । अभिध्यानं चिन्तनं सङ्कल्पो वा । ब्रह्मणः संकल्पादेव सर्वेषां पदार्थानामुत्पत्तिः । न तत्र तस्य कश्चन श्रम इति भावः । कथमवगम्यत एतत् ? तल्लिङ्गात्-लिङ्गं च "द्यावापृथिवी जनयन्देव एकः" (ऋ०)"इन्द्रः स्वर्षा जनयन्नहानि जिगायोशिग्भिः पृतना अभीष्टिः। प्रारोचयन्मनवे केतुमह्नामविन्दज्ज्योतिर्बृहते रणाय॥

(ऋ० ३।३४।४)। " स पूर्ववज्जनयञ्जन्तवे धनं समानमज्मं पर्येति जागृविः ॥ " (ऋ० ३।२।१२)। "द्यावापृथिवी जनयन्नभिव्रताप ओषधीर्वनिनानि यज्ञिया। " (ऋ० १०।६६। ९)। तस्मात्तद्ब्रह्मैव सर्वेषामुत्पादकमिति ॥ २।३।१४ ॥

विपर्ययेण तु क्रमोऽत उपपद्यते च ॥ २।३।१५ ॥

विपर्ययेण तु सृष्टिक्रमो यत्र कुत्रापि श्रूयते सोप्यत एवोपपद्यते। चोप्यर्थे। सृष्टिक्रमविपर्ययो यथा– "तस्माद्विराडजायत, विराजो अधिपुरुषः, स जातोत्यरिच्यत, पश्चाद्भूमिम्, पशूंस्तांश्चक्रे वायव्यानारण्यान् ग्राम्यांश्च ये, तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे, तस्मादश्वा अजायन्त ये के चोभयादतः। गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः॥ चन्द्रमा मनसो जातः, चक्षोः सूर्यो अजायत, मुखादिन्द्रश्चाग्निश्च, प्राणाद्वायुरजायत, पद्भ्यां भूमिः, दिशः श्रोत्रात्," इत्यादिः। परं ब्रह्म सर्वथा स्वतन्त्रं, न तत्पारतन्त्र्यं धत्ते। क्रमानुरोधमन्तरेण विक्रमतोपि सृष्टिरचनानैपुण्यं ब्रह्मणो ब्रह्मत्वं विशोभयति। एवं "ऋतं च सत्यं चाभीद्धात्तपसोध्यजायत। ततो रात्र्यजायत ततः समुद्रो अर्णवः। समुद्रादर्णवादधि संवत्सरो अजायत " इत्याद्युक्तसृष्टिक्रमवर्णनवैपरीत्यं न विदुषां बुद्धिं विकल्पयति ॥ २।३।१५ ॥

अन्तरा विज्ञानमनसी क्रमेण तल्लिङ्गादिति चेन्नाविशेषात् ॥ २।३।१६ ॥

विज्ञानमिन्द्रियसमुदायः। विज्ञायन्ते पदार्था येन तद्विज्ञानमितिव्युत्पत्तेः। विज्ञानमनसी अन्तरा विज्ञानमनसोर्विषये क्रमेण सृष्टिसंभावनम्। तल्लिङ्गात्। लिङ्गं च, "मनश्च मे चक्षुश्च मे श्रोत्रं च मे" (शु० यजु० १८।२) इति चेन्न। अविशेषात्—सृष्ट्युत्पादने क्रमो भवतु न वा भवतु, नास्ति कश्चन विशेषः। गर्भस्थे कलले पूर्वं नयनोत्पत्तिर्वा पादोत्पत्तिर्वा मुखोत्पत्तिर्वेति केन ज्ञायते? अतः सृष्टौ क्रमो नापेक्षितः। पूर्वं सूर्योजायत तारका वेति पूर्वं पृथिव्यजायतापो वेति ब्रह्माधिकृत्य न किञ्चिद्विवेचनीयम्। सर्वज्ञं सर्वशक्ति हि तत्। यस्य यदापेक्षा तस्य तदा निर्माणमित्येव वक्तव्यम्। अत्रैव ब्रह्मणो ब्रह्मत्वं शोभतेतराम् ॥ २।३।१६ ॥

चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशोभाक्त-
स्तद्भावभावित्वात् ॥ २।३।१७ ॥

ब्रह्म चराचराणां सर्वेषां व्यपाश्रयः समाश्रयः। तु तस्मात्। तद्व्यपदेशोऽभाक्तो मुख्य एव। एवमत्र बोद्धव्यम्। ब्रह्म चराचरवस्तुजातस्याश्रय एव न तु तद्वस्तुरूपमेव। घटपटादीनां क्षित्यप्तेजोवाय्वादीनां च ब्रह्म केवलमाश्रयो न तु घटपटादिस्वरूपम्। तथापि "तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमाः। तदेव शुक्रं तद्ब्रह्म ता आपः स प्रजापतिः ॥" (शु० य० ३२।१) इति तद्व्यपदेशो नाभाक्तो न गौणः। कुतः? तद्भावभावित्वात् भावः सत्ता। तद्भावेन तत्सत्तया ब्रह्मसत्तयेत्यर्थः। भावित्वा-

त्सत्तावत्त्वात् । ब्रह्मसत्तयैव ब्रह्मेतरवस्तुसत्तेति तत्सत्तासत्तावत्त्वात्सर्वपदार्थानां तदभिन्नत्वमवगन्तव्यं जीवब्रह्मणोः शरीरशरीरिभावाद्वा । " स एव जातः स जनिष्यमाणः प्रत्यङ्जनास्तिष्ठति सर्वतोमुखः । " (शु० यजु० ३२।४) इयं याजुषी श्रुतिरपि ब्रह्मात्मनोः शरीरशरीरिभावमेव प्रख्यापयति ॥ ३।३।१७ ॥

(इति तेजोधिकरणम्—२)

—०—

(अथात्माधिकरणम्—३)

नात्मा श्रुतेर्नित्यत्वाच्च ताभ्यः ॥ २।३।१८ ॥

आत्मस्वरूपशोधनार्था प्रवृत्तिः सूत्रकाराणाम् । अतति सर्वास्वेव योनिषु कर्मवशादित्यात्मा जीवः । नन्वथातो ब्रह्मजिज्ञासेत्येव प्रतिज्ञातं कथं तर्ह्यात्मस्वरूपविशोधनप्रवृत्तेरौचित्यमिति ? एवम् । ब्रह्म तु सर्वस्य वस्तुजातस्य शरीरिभूतम् । शरीरिणः शरीरेण भाव्यमेव । अतोत्रावश्यकत्वाद्ब्रह्मशरीरभूतात्मस्वरूपशोधनप्रवृत्तिरुचितैव । आत्मोत्पद्यते न वेति विशयः । उत्पद्यत इति पूर्वः पक्षः । तथा हि श्रुतिः—" यस्माज्जातं न पुरा किंच नैव य आबभूव भुवनानि विश्वा " (शु० यजु० ३२।५) यस्माद्ब्रह्मणः पुरा पूर्वं किंचन नैव जातमासीत् । यश्च विश्वानि सर्वाणि भुवनानि आबभूवाभावयाम्बभूव । स प्रजापतिः....। ब्रह्मणः पूर्वं किञ्चिदपि नैवा-

सीत् । अत्र पदार्थमात्रस्य सृष्टेः पूर्वं निषेधः श्रूयते । तस्मादात्माप्युत्पद्यत एवेति । "स नो बन्धुर्जनिता स विधाता" (शु० यजु० ३२।१०) इति श्रुतिरप्यस्मत्पक्षपातिनीति । अत्रोत्तरम्—नात्मोत्पद्यत इति । कुतः ? श्रुतेः । श्रुतिरात्मनो नित्यत्वेमेव प्रतिपादयति । का सा श्रुतिः ? इयं हि सा, "ऋतस्य तन्तुं विततं विचृत्य तदपश्यत्तदभवत्तदासीत्" इति (शु० यजु० ३२।१२)। ऋतस्य यज्ञादेस्तन्तुं परम्परां विचृत्य विच्छिद्य तद्ब्रह्म स आत्मापश्यत्, तत्तदेवाभवत्, तत्तदेव पूर्वमप्यासीत् । यदासीत्तदेवाभवदित्युक्तम् । आत्मा ब्रह्मशरीरमेवासीद्-ज्ञानकालेपि स तथैवासीदिति । नैतत्समाधानम् । नानया श्रुत्या प्रतिपाद्यत आत्मापि नित्य एवेति । इयं तर्हि श्रुतिरात्मनित्यत्वं प्रतिपादयति "अस्याजरासो दमामरित्रा अर्चद्धूमासो अग्नयः पावकाः । श्वितीचयः श्वात्रासो भुरण्यवो वनर्षदो वायवो न सोमाः ॥" (शु० यजु० ३३।१) अस्या ऋचोर्थः—अस्य ब्रह्मणः सोमाः शोभायुक्ताः पुत्रा मनुष्यादयोजरासोजरावन्तो निर्जरस इत्यर्थः । अत्रात्मनां जरावस्था निषिध्यते । एतन्निषेधेन सर्वा जनिवृद्ध्याद्या अप्यवस्था निषिध्यन्त एव । ततश्च तन्नित्यत्वं न कस्यापीर्ष्याकृद्भवति । अन्यापि श्रुतिः—"द्वे विरूपे चरतः स्वर्थे अन्यान्या वत्समुपधापयेते । हरिरन्यस्यां भवति स्वधावाञ्छुक्रो अन्यस्यां ददृशे सुवर्चाः ॥" (शु० यजु० ३३।५) । अस्य मन्त्रस्यार्थः—

द्वे चिद्ब्रह्मणी विरूपे विरुद्धं रूपं ययोस्ते । ब्रह्मणो व्यापकत्वं जीवस्य चाणुत्वमिति विरुद्धं रूपम् । आमोक्षं संसरणं जीवानाम्, ब्रह्मणस्तु न तथात्वम् । इतिरूपभेदः । किंच विरूपे रूपरहिते । कथंभूते ते द्वे ? स्वर्थे–शोभनोर्थौ ययोस्ते । अर्थः प्रयोजनम् । ब्रह्मणो जीवस्य च प्रयोजनं शोभनमेव । ब्रह्म जीवांस्तारयति लोकदुःखेभ्यो निवारयतीति ब्रह्मणः शोभनं प्रयोजनम् । जीवश्च स्वकल्याणधिया परमात्मानमुपगच्छति तपोबलेन च समागतान् विघ्नान्निवारयितुं सप्रयत्नो भवतीति जीवस्य शोभनं प्रयोजनम् । अन्या चिज् जीवो वत्सं स्थैर्यं नित्यत्वमितिभावः । वद स्थै । सः प्रत्ययः । उपधापयेते धत्त इत्यर्थः । हरति सर्वं क्लेशमिति हरिः परमेश्वरोन्यस्यां सन्मार्गसेविन्यां चिति जीवे इत्यर्थः । स्वधावान् भवति संरक्षको भवतीत्याशयः । शुक्रः आत्मा जीवोन्यस्यामन्यस्मिन् ब्रह्मणीत्यर्थः । स्थितः सन् सुवर्चाः सुतेजा दृश्यते ॥ ननु नात्र रूपराहित्यं श्रुतिरुपदिशति ब्रह्मणः किन्तु विभुत्वमणुत्वं च बोधयति ।

इयं तर्हि श्रुतिर्गृह्यताम्–"विश्वेषामदितिर्यज्ञियानां विश्वेषामतिथिर्मानुषाणाम्" (शु० य० ३३।१६)। विश्वेषां सर्वेषां यज्ञियानां याज्ञिकानां मध्ये स आत्मा । अदितिरदीनोविनाशीत्यर्थः । दोवखण्डने । इयमपि श्रुतिर्न सन्तोषयित्री । कुतः ? विश्वेषां यज्ञियानामात्मनां मध्येयं जीवो-

दितिः, विश्वेषां मध्येयं जीवोतिथिरितिवचनेन यस्य कस्यचिज्जीवस्य नित्यत्वं बोधयति न तु जीवमात्रस्य। अस्तु तर्हीयं श्रुतिः–"द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।" (ऋ० १।१६४।२०)। आत्मपरमात्मनोरेवात्र समानधर्मता प्रदर्शिता। एवं च नित्यत्वमपि परमात्मनीवात्मन्यपि संगतमेव। सूत्रार्थस्तु–आत्मा नोत्पत्तिमान्। श्रुतेः श्रुतिप्रामाण्यात्। ताभ्यः श्रुतिभ्यः श्रुतिप्रमाणेभ्यो नित्यत्वाच्चात्मनः। अस्मिन्सूत्र आत्मेत्येकवचननिर्देशेनात्मैकत्वं व्यासाभिमतमिति न मन्तव्यम्। सामान्यनिर्देशात् ॥२।३।१८॥

ज्ञोत एव ॥२।३।१९॥

सचानाद्यनन्त आत्मा ज्ञो ज्ञातृत्वस्वरूपः। कुतः? अत एव श्रुतिभ्य एव। श्रुतिषु तथैव प्रतिपादनात्। जानातीति-ज्ञः। कर्तरि प्रत्ययः। एवं च ज्ञातृत्वमेव तस्य स्वरूपम्। कास्ताः श्रुतयः? एताः–"उदु त्यं जातवेदसं देवं वहन्ति केतवः। दृशे विश्वाय सूर्यम् ॥" (ऋ० १।५०।१) "विश्वान्देवानावह सोमपीतयेऽन्तरिक्षादुषस्त्वम्।" (ऋ० १।४८।१२) "वयुनानि विद्वान्" (ऋ०१।१८९।१) "अग्निर्होता कविक्रतुः" (ऋ० १।१।५)। "पावकवर्णाः शुचयो विपश्चितोभि स्तोमैरनूषत" (अथ० २०।१० ४।१) इति। ज्ञ इतिकथनेन ज्ञानमेवात्मेति वादो निराकृतः ॥२।३।१९॥

उत्क्रान्तिगत्यागतीनाम् ॥२।३।२०॥

नात्मा सर्वगतः । अणुरेव सः । कुतः ? तस्योत्क्रान्तेर्गतेरागतेश्च श्रवणात् । यद्यात्मा विभुः स्यादुत्क्रान्त्यादीनां न स्यात्संभवः । विभुर्व्यापकः । व्यापकत्वं च तत्समानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकधर्मवत्त्वम् । यदि व्यापकत्वमात्मनः स्वीक्रियेत तस्योत्क्रान्त्यादयो न संभवेयुः । तथा च "आ यात पितरः सोम्यासो गम्भीरैः पथिभिः पितृयाणैः" (अथ० १८।४।६२) इत्यागतिः । "परा यात पितरः सोम्यासो गम्भीरैः" (अथ० १८।४।६३) इति गतिः । इयमेवोत्क्रान्तिः । तेभिर्याहि पथिभिर्देवयानैर्यैरीजानाः स्वर्गं यन्ति लोकम्" (अथ०१८।४।२) । "ऋतस्य पन्थामनुपश्य साध्वङ्गिरसः सुकृतो येन यन्ति" (अथ०१८।४।३) अन्यद्व्याख्यानम् । उत्क्रान्तिर्मोक्षः । गतिः कर्मवशाल्लोकान्तरगतिः । आगतिर्लोकान्तरात्पुनरस्मिँल्लोकआगमनम् । उत्क्रान्तिर्यथा—'यद्वो अग्निरजहादेकमङ्गं पितृलोकं गमयं जातवेदाः । तद्व एतत्पुनरा प्यययामि साङ्गाः स्वर्गे पितरो मादयध्वम् ॥" (अथ० १८।४।६४) । अस्यार्थः—वो युष्माकं मध्यादग्निर्गमनशीलो जातवेदा लब्धज्ञानो मोक्षाधिकारी जीवः । पितृलोकं मोक्षलोकम् । जननमरणाभ्यां यः पाति स लोकः पितृलोको मोक्ष इति यावत् । गमयं गच्छन् । यदङ्गमजहाद्, अणुरात्मा शरीरे यदङ्गमाश्रित्य तिष्ठति तदङ्गमजहात् । .... । "विश्वस्य

हि प्रेषितो रक्षसि व्रतमहेडयन्नुच्चरसि स्वधा अनु । यदद्य त्वा सूर्योपब्रवामहै तं नो देवा अनु मंसीरत क्रतुम् ॥" (१०। ३७।५)। विशेषेण श्वयति श्वाययति वर्धयति जगदिति विश्वः परमेश्वरः। तस्य तेन प्रेषितो गमितो रक्षस्यात्मानमितिशेषः। व्रतं लौकिकं कर्म अहेडयन्नतिरस्कुर्वन् स्वधा स्वं दधातीति स्वधा स्वरक्षकं परमात्मानम् अनु उद्दिश्य उच्चरस्युत्क्राम्यसि। हे सूर्य उपसरणशील आत्मन्, अद्य त्वाम् उद्दिश्य उपब्रवामहै प्रार्थयामहे तं परमात्मानम्; नोस्माकमुपासिता देवाः क्रतुमुच्चरन्तमात्मानमनुमंसीरत स्वीकर्तुमनुमन्यन्ताम्। अत्राप्युच्चरणं श्रूयते ।२।३।२०॥

स्वात्मना चोत्तरयोः ॥२।३।२१॥

पूर्वस्मिन्सूत्र उत्क्रान्तिर्गतिरागतिश्चेतित्रयमात्मनोणुत्वे समर्थनवचनम्। यद्यपि गत्युत्क्रान्त्योर्न कश्चिद्वैशेषिको भेदः। गतिशब्देन केवलं गमनं तु नैव विवक्षितम्। अबुद्धिवादात्। आगतिरपि न गृहादागमनं वाराणस्या वेति कथयति। सामान्यात्। एवं गतिर्गमनमागतिश्च जन्मेत्येव विवक्षितम्। गमनं मुक्तजीवपथेन वा स्याद्बद्धजीवपथेन वा स्यात्। गतिशब्दो मोक्षार्थकोपि सहस्रेषु स्थानेषु प्रयुक्तः सर्वसिद्ध एव। उत्क्रान्तिर्देहस्वामित्वनिवृत्तिर्देहनिवृत्तिरेव वा। न हि व्यापकस्यात्मनो व्यापको देहोद्यावधि कश्चित्केनचिद्दृष्टः।

न वाऽव्यापकस्यात्मनोणुत्वविशिष्टो देहोद्यापि कल्पयितुं शक्यः। जीवब्रह्मणोर्देहदेहिभावस्तु व्याप्यव्यापकभावादवधारितः। न हि वस्तुतो जीवादि शरीरं तथा ब्रह्मणो यथा जीवानां मनुष्यपश्वादि शरीरमिति। अत एव तत्र देहदेहिभावस्थाने धार्यधारकविशेषणविशेष्यादिशब्दा अपि प्रयुक्ता भवन्ति। चेतनं प्रत्याश्रितत्वं, चेतनं प्रति नियाम्यत्वं चेतनं प्रति शेषत्वमङ्गत्वमित्यर्थ इतिशरीरलक्षणं स्वीकृतम्। नियमेनाश्रितत्वं नियमेन नियाम्यत्वं नियमेन शेषत्वं ब्रह्म प्रति शरीरस्येति वेदितव्यम्। एवं च जीवशरीरेपि लक्षणमिदं संगतम्। शरीरस्य जीवाश्रितत्वनियाम्यत्वशेषत्वादिकं सर्वदा सर्वथास्त्येवेति। उपर्युक्तलक्षणलक्षितशरीरत्वमेवात्र विवक्षितम्। जीवनित्यविभूतिप्रकृतिकालादेरपि यदि शरीरत्वं विवक्षितं तदेश्वरतज्ज्ञानव्यतिरिक्तं द्रव्यं शरीरमिति लक्षणमवधेयम् ॥२।२।२१॥

नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात् ॥ २।३।२२॥

जीवो नाणुपरिमाणः कुतः ? अतच्छ्रुतेः। नास्ति काचिच्छ्रुतिर्जीवस्याणुपरिमाणोल्लेखनीति चेन्न। इतराधिकारात्। यत्र यत्रात्मनोनणुत्वं श्रूयते तत्र सर्वत्रेतरस्य परमात्मनोधिकारो नात्मनः। यथा "स पर्यगादि" ति श्रुतिः परमात्मानमेवाधिकरोति न जीवात्मानम्। स पर्य-

गादित्यस्य परितः सर्वतो देवमनुष्यादिशरीरमेतीति नाथः। पर्ययनं व्यापकत्वमाह नतु देहाद्देहान्तरगमनम्। तर्ह्यात्माणुत्ववादिनी का श्रुतिः? श्रूयताम्—“यो ममार प्रथमो मर्त्यानां यः प्रयाय प्रथमो लोकमेतम्” (अथ० १८।३।१३) अस्मिन्मन्त्रे मरणार्थस्त्वेकं शरीरं परित्यज्यान्यस्मिञ्शरीरे गमनरूपः। प्रायणमपि प्रायेण तथैव। एवं चायनं प्रायणं च जीवाणुत्व एव संभवतो न विभुत्वे। विभुनो वस्तुनो गत्यागत्योरसम्भवात्। ननु यो ममारेत्यनेन जीवस्यैव मरणं निश्चीयते, एवं च मरणधर्माणो जीवा इत्यायातम्। न। यो ममारेत्यस्य यः प्राणं तत्याजेत्यर्थः। प्राणत्यागकर्ता न म्रियत इति स्पष्टमेवात्र॥ २।३।२२॥

स्वशब्दोन्मानाभ्यां च ॥२।३।२३॥

स्वशब्दः साक्षादणुशब्दः। यथा—“बालादेकमणीयस्कमुतैकं नेव दृश्यते। ततः परिष्वजीयसी देवता सा मम प्रिया॥” (अथ० १०।८।२५)। उन्मानमुत्कृष्टं मानमुन्मानम्। वेदप्रमाणमित्यर्थः। तथा च ‘यदि क्षितायुर्यदि वा परेतो यदि मृत्योरन्तिकं नीत एव। तमाहरामि निर्ऋतेरुपस्थादस्पार्षमेनं शतशारदाय॥” (ऋ० १०।१६१।२)। एवं च स्वशब्देनोन्मानेन चात्मनोणुत्वसिद्धिः ॥२।३।२३॥

अविरोधश्चन्दनवत् ॥२।३।२४॥

यद्यात्माणुपरिमाणः कथं सकलस्वदेहसंमर्दनीं व्यथां